१०२/१

102/1

"अथ"

Tantaratna

ग्रन्थनामः "तन्त्ररत्नम्" (तृतीयाध्याये तृतीयः पादः)

कर्तृनामः- "पार्थसारथि मिश्रः" Parthasarthy Misr (अपूर्ण)

विषयः- "पूर्वमीमांसा" (मीमांसाशाबरभाष्यवार्त्तिकव्याख्यानम्)

830

१०२/१

अथ
पार्थसारथिमिश्रप्रणीतम्

[redacted]

102/1

मीमांसाशाबरभाष्यवार्तिकव्याख्यानं तन्त्ररत्नं
तृतीयाध्याय तृतीय पादीयं प्रारभ्यते

102/1

॥ ॥श्रीगणेशाय नमः॥ ॥श्रुतेर्जाताधिकारः स्यात्॥ वाक्यस्य लिंगाद्द्वाराश्रुतिकल्पनेन विनियोगहेतुत्वात् लैंगिकवि
नियोगप्रकारचिंतानंतरं वाक्यीयविनियोगप्रकारचिंतायाः संगतिमाह एवमिति॥ लिंगाधिकरणोपक्रमवार्त्तिकवदिह
१ पि विशदाद्द्वारेणादिविशिष्टरूपविनियोगोक्तेर्विनियोगप्रकारोक्तिः वाक्यमरुणया क्रीणातीति त्रिकरणाधिकरणभाष्याद
रुणाधिकरणे वाक्यीयविनियोगप्रकारचिंताशंकां निराकर्तुमुद्देश्येत्यवाक्यमुदाहरणमित्याह तत्रेति॥ वेदोपक्रमस्य
गाद्यपसंहारं चान्यदपि वाक्यमत्रोदाहरणमित्याह तद्यदीति॥ तत्रेति संदेहसाध्यं व्याचष्टे तत्रेति॥ ऋगादिशब्दवाच्याना
पादादिसमूहसामान्यरूपाणां जातानां ऋगादिशब्दैर्ग्रहणं वेदानां वेत्येवं भाष्ये व्याख्याते शब्दार्थचिंतायाः लक्षणासंग
तिमाशंक्य तत्तादि मंत्रप्रकाश्यकर्मणि उच्चैस्त्वादिवाक्येन विनियुज्यते मंत्रश्रेषु च स्वरादिमहाद्याहतिति निर्गार्हपत्याद्य रम
ग्निविशिष्टहोमाद्यर्थं यदाहितकर्मणि उच्चैस्त्वादिकं मंत्रेषु च घायश्चित्तमित्येवं विनियोगाचिंताफलत्वात् लक्षणा

संगतिसूचनायोक्तं स्मृत्या ध्रुवक्तां वाक्यव्यापारालोचनेपि पूर्वप्रवृत्तो ह्रवसूचनायोपक्रमोपसंहारस्थपदान्वयानपेक्षश्रुति
वशत्वेजातग्रहणास्याक्षे श्रुतिविरोधात्सिद्धांतायोगमाशंक्यविनियोगश्रुत्यव्यापारादविरोधोभिधानोक्त्या पूर्वितः। श्रु
तिवशाद्वेदग्रहणाप्रतीतेः संदेहायोगंशंकतेऽक्तेतइति। श्रुतिवशात्पूर्वपक्षसंभावनातिशयायोग्या। व्यक्तंतस्मात्पूर्व
पक्षस्यापिवाक्येनैवकरणात्पदानांचान्योन्यविरोधेसत्येकवाक्यत्वायोगादेकानुरोधेनेतरस्यव्याख्येयत्वावगतेरुप
क्रमोपसंहारस्थयोः श्रुत्योर्विरोधेबलाबलविशेषोस्तिनवेतिसंदेहाद्विशेषाभावेविष्णुद्देशार्थवादविरोधेनगुणावि
रोधेचतादर्थ्यादित्यनेनन्यायेनविष्णुद्देशस्यार्थवादंप्रतिप्राधान्यात्प्रबलीयस्त्वावगतेर्विष्णुद्देशरूपोपसंहारस्थगा
दिश्रुतिबलीयस्त्वात्तदनुरोधेनार्थवादरूपोपक्रमस्थावेदश्रुतिर्व्याख्येयाउपक्रमबलीयस्त्वेनतूपक्रमस्थवेदश्रु
त्यनुरोधेनउपसंहारस्थाक्षरादिश्रुतिर्व्याख्येतिपक्षद्वयप्रतिभानात्संदेहमुपपादयतिएकेति। ~~एतदेकोपपक्षस्ति~~

त्रौ॰

मा॰भ ॥ एतदेवोपपादयति उपक्रमे हीति ॥ यो होता सोऽध्वर्युरित्यादावुपक्रमोपसंहारयोर्द्वयोरपि विध्युद्देशश्चत्वे सत्युप
२ क्रमं बलीयः । स्तोऽपि ह्यत्रार्थवादरूपस्योपक्रमस्य विध्युद्देशेन बाधनिश्चयात् संदेहो योगमाशंक्याह स चेति ॥ विध्युद्देशस्या
र्थवादकृतप्ररोचनां विना पर्यवसानसंभवेऽप्यर्थवादानर्थक्यपरिहारायार्थवादैकवाक्यत्वाभ्युपगमे विध्युद्देशबली
यस्त्वेन तस्येह मात्रस्यांऽजन[illegible]साधनत्वनिश्चयावगतेः प्ररोचनं विना पुंसः प्रवर्त्तयितुमशक्यत्वात् अर्थतादर्सोनिधौ स्थ्ये ग्य
द प्ररोचकत्वायोगार्थवादानपेक्षस्य विध्युद्देशस्य प्रवर्त्तकत्वायोगेनार्थवादकृतप्ररोचनं विना विध्युद्देशापर्यवसाना
भ्युपगमे तु अर्थवादे दृष्टतास्थ्यविशेषग्रहणात् दृष्टतस्यैव साधनत्वनिश्चयात् प्ररोचनां विना पर्यवसानसम्भवासंभवसं
देहात्तेन ह मात्रेणाक्रुथ्याः शाकशा दृष्टतेनैव वेतिसंदेहः संभवतीति परिहारेण ॥ यथा संदेहः समर्थितः रा॰
त येहापि समर्थनीय इत्यर्थः ॥ पोनस्त्वं तहीत्याशंकते एवं तर्हीति ॥ विध्युद्देशेंऽजनसाधनद्रव्यानुपादानात् संदिग्ध २

र्थस्य दौर्बल्यं वक्तुं युक्तं न तु तिङ्श्रुतार्थस्येत्याशंकाधिक्याद् आरंभ इत्याशयेन परिहरति न्याय्यमिति। विध्युद्देशस्थश्रु-
तिबलीयस्त्वाद् उद्देश्यत्वादिविधौ ज्ञातस्य विधेयोद्देश्यत्वादिविषयत्वे त्येवं पूर्वपक्षं व्याख्यायार्थं किं तावद् इत्यादिभाष्यं व्याचष्टे
किमिति। अत्राधिकरणपूर्वपक्षे विध्युद्देशस्योपक्रमस्थत्वात् बलीयस्त्वोपपत्तेः न तन्न्याय्ये नास्योपसंहारस्थस्य बलीय-
स्त्वायुक्तेत्याशंकानिरासार्थत्वेनोपक्रमस्थया वेदश्रुतेर्लक्षणया जातविषयतायुक्ता न तु ऋगादिशब्देन वेदानां
लक्षणया प्यधिकारो विषयीकारः संभवतीत्येवमाद्यत्वा सूत्रव्याख्यार्थं वेदानामिति भाष्यं व्याख्यातुं लक्षणासंभावना
यान्योन्यान्वयं तावदाह किं चेति। सूत्रात्त्वहं तन्निसूचनार्थात् किं चोक्तिः। यथाग्नीषोमीयं पशुमालभेतेति विध्युद्देशस्थपश्वा-
ख्यद्रव्यं सामान्यरूपत्वाद् वाक्यशेषभूतमंत्रस्थेन छागाख्येन विशेषेण भावनायां नेकधात्वर्थानुरंजनसहत्वे न सामान्य- नविरुध्यतेस्येरो णानपन्ः
रूपत्वात् द्रव्यदेवताद्वयानुमितवाक्यशेषस्थेन यागाख्येन धात्वर्थविशेषेण न विरुध्यते तथा गादयो वा तरसमूहरूप

अग्नये ध्रुवस्वेतिका क्यरे सृस्ये क च च नां ते [illegible] न व्यन्य यदति द्धि वृब वनेघ्रुपिं स भवान्ति निर्यिः।
गौह्नतोत्पत्ति

मा.भ
३

त्वाद्विशेषस्थानीयामहासमूहरूपत्वात्सामान्यस्थानीयैर्वाक्यशेषस्थैर्वेदैर्न विरुध्यंते किंत्वन्वीयंते तत तत्र्यसंभवतिता
वल्लक्षणोत्याशयः। लक्षणासंभवे पि वेदोक्तैर्वर्णादयो लक्ष्यंते न त्वगाद्युक्तत्वाद्वेद इति कुतो वधारणेत्याशंक्याति रस्म
न्ताध्यव्याख्यां सूचयति न कथंचिदिति। ब्राह्मणोपि वेदप्रसिद्धेः सुतरां नववदंतीत्युक्तं। पक्षद्वयेपि सामर्थ्येनोच्चैस्त्वा
दीनामृगादिमंत्ररूपशब्दाख्यजातधर्मत्वाद्वेदविषयत्वपक्षे ऽनेकवेदविहितानामृगादीनामुच्चैस्त्वापांशुत्वरूपवि
रुद्धधर्मद्वयप्राप्त्यावष्टदोषविकल्पापत्तेर्जातविषयत्वेनैव युक्तेत्येवमाहुः स्यान्यथासूत्रव्याख्यार्थमपि वेदेति साध्यंव्या
चष्टे किं चेति। जातस्यतावदनेकवेदविहितत्वेप्येकर्गादिरूपस्य ग्रहणादेकोच्चैस्त्वादिधर्मावधारणं शक्यं वेदानां त्व
नेकजातसंकीर्णत्वाद्वेदविषयत्वपक्षे सामर्थ्यप्राप्तजातधर्मोच्चैस्त्वादिसंकरः स्यादित्यर्थः॥ ॥ श्लोकं व्याचष्टे ऋचो हि राम
तिवेदविहितत्वस्य धर्मान्वयहेतुतयोत्तराधिकरणे वक्ष्यमाणत्वात्पठतिविधिलक्षणार्थः। भाष्यस्थस्य पदस्य ग्रहणा। ३

स्योपलक्षणार्थत्वं तथेत्यनेनोक्तं उद्देश्यादिविधानस्य ज्योतिष्टोमप्रकरणोक्तेर्वेदविषयत्वेन प्रकरणेन वशीक
रणयोगात्प्रकरणबाधापत्तेर्ज्ञातविषयत्वेव युक्तेत्येवमन्यथासूत्रव्याख्यानार्थं प्रकरणं चेति साध्यंद्याचह्येज्योतिष्टो
मेति। प्रकृतज्योतिष्टोमात्यागेऽपि प्रकरणस्यानादरादुल्लंघनं। ऋग्वेदादिविहितत्ववत् ऋगादिप्रकाश्यत्वस्यापि सर्व
क्रतुसाधारणान्न द्रव्यत्वपक्षेऽपि प्रकरणबाधाख्यदोषसाम्यापत्तेरनुवाद्यत्वेन प्रकरणापेक्षत्वात्प्राकरणिकस्यर्ची
यत्प्रकाश्यते तदुद्देशेनोच्चारितया प्रकाशनीयमिति वाक्यार्थप्रतीतेर्ज्योतिष्टोमिकज्ञातविषयत्वेन ग्रहवस्थाभ्युपग
माद्दोषपरिहारे तु वेदविहितधर्मत्वपक्षेऽपि प्राकरणिकेन ऋग्वेदेन यद्विधीयते तदुद्देशेनोच्चारितेन शब्देन प्रका
शनीयमिति वाक्यार्थोपपत्तेर्ज्योतिष्टोमिकऋग्वेदविषयत्वेन ग्रहवस्थाया परिहारस्यापि साम्यापत्तेर्नैकः पर्यनुयोक्त
व्य इत्याशंक्य तेनत्विति। ज्योतिष्टोमप्रकरणे यो वेदः तेन यद्विधीयते इति वाच्ये कृत्स्नस्य वेदस्य ज्योतिष्टोमप्रकरणानाद्या

मा॰भ॰ नेः यावानित्युक्तं। जातस्यर्गादिशब्दवाच्ये वर्णसंघाते प्रत्येकं दृष्टत्वेः प्रकरणाध्यायादौ समाप्तत्वाद्यवच्छेदोपपत्तेर्वेदत्व
४ स्य तु प्रकरणाद्धे वेदभागे समाप्तत्वाभावात्तदव्यवच्छेदानुपपत्तेर्न परिहार उच्यते तत्राह नैतदिति। व्यतिरेकमुखेनातुल्य
त्वमुपपादयति सर्वेति। श्लोकद्वयेनाव्ययमुखेन विवृणोति मंत्रेति। विधिर्विधेयं तर्कश्च वेद इति विधिशब्दोक्तस्य वि
धायकब्राह्मणभागस्य विधेयशब्दोक्तानां च [illegible] मंत्राणां मननविध्यपेक्षितात्मतत्वतर्कणार्थं जगज्जननात्मद्योमा
यामिधायिनो यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीति तद्विजिज्ञासस्व तद्ब्रह्मेत्याद्यु
पनिषद्भागस्य च वेदत्वस्मृतेस्तत्समूहे काठकाद्याख्येऽनेककर्तृविषये वेदत्वं पादसमूहे त्वेकवाक्यभूतऋग्जातं पदसमू
हे यजुर्जातं च अवच्छेदरूपमंत्रावयवात्मका छंदपर्व समूहे सामजातं वर्तत इत्यर्थः॥ जातशब्दस्य समूहसामान्यवाचित्वं व राम
नादिशब्ददृष्टांतेनोपपादयितुमाह यथेति। संघातसामान्याद्भिन्ना वृक्षादिसंघाता यथा वनादिशब्दवाच्याः तथा ऋगादि ४

पं:२

शब्दवाच्यानां पादादिसमूहानां सामान्यानि जातशब्देनोच्यंत इत्यर्थः॥ जात्यधिकारा इति भाष्ये गामर्द्धमित्रादिभिश्च व्याख्याकृभि
र्जातिशब्दस्य जातिवाचितया व्याख्यानाच्च समूहवाचितानयुक्तेत्याशंक्याह जातिरेवत्विति। अगमादिजात्ययोगां विच्छिन्न
यव्ययंगपेश्चनि त्यैः सर्वगातैरपि द्यतिरिक्तपदारंभो वर्णैर्नावोपपद्यते। अनारब्धे दगोशब्दे गोशब्दत्वं कथं प्रवेदिति वा
च्चिकोगोकंशब्दत्वायोगान्यायेन तद्भूताधिकरणोक्तवाक्यत्वायोगवदुपपादयितुमाह द्विवर्णापीति। प्रातिपदिक
कंठादिभिः स्थानैरि तिप्रकृतः पाठः। ग्रायो द्विशब्दः। म्लोकंद्यावष्टेयथैवहीति। भिन्नैः कार्णादिभिः स्थाने रुच्चारणप्रकाराख्ये श्चकरणे समदेतुभूते श्चप्रयत्नै
र्धैर्यग्रलेन क्रमवत्वादयुगपज्ज्ञाविनां वर्णानां वर्णसमुदायात्मकानां वाक्षराणामक्षरसमुदायात्मकानां वा पदानां नाप्ययंस्थितमित्य ग्रेणान्वयः।
समूहे वाक्यां त्येवा वर्णो जातिरूपं वाक्यत्वं तन्मणत्वादिवत्कल्पयित्वमारस्यमाणां न चांत्यवर्णवेलायां तेषामालोचनाः
संस्रवः पदस्य तद्वाच्यसंबंधबुद्धिग्रवधिबाधनादिति तद्भूताधिकरणोक्ताद्धिलक्षणानां पदरूपाणां वाक्यावयवानां ग्रहणा
ग्रहणरूपैः पदार्थानां पदपदार्थसंबंधानां च स्मरणरूपैः प्रत्ययैः पदार्थानां चान्योन्याकांक्षानिर्धवधानात् जात्या अयानुसंधानेन जाति १

सामान्यरूपं ज्ञातमपि तस्मादित्याशंक्याह किं स्विति। अयौगपद्येप्येकार्थप्रतिपादकत्वलक्षणैक धर्मयोगात्समूहोपपत्तिरित्याशयः। सामान्ये जातिवाचित्वात्

योगात् यथा तावद्यवसितं तत्वर्गादौ निजातिरूपाणि कल्पयितुं न शक्यानीत्यर्थः। अयुगपज्ज्ञावित्वेन तर्हि समूहस्या
प्ययोगात्तत्सामान्याभ्युपगमे ज्ञात्यप्रकृतवीन युक्तं इत्याशंक्याह। यौगिकां नामिति। साधारणवाच्ययं सामान्यशब्दो
न जातिवाचीत्याशयः। जातौ के अर्थसमूहवाचितया लोकप्रसिद्धत्वात् न जातिवाचित्वव्याख्या युक्तेत्याह लोकेपि चेति
॥ ॥ वेदो वा प्रायदर्शनात्॥ ॥ किमि[illegible]दमिति प्रश्नभाष्याशयं व्याचष्टे किमिति। गत्यर्थकृसिसमानार्थत्वेन गाः प्रकृ
माख्योपक्रमवाची प्रायशब्द इत्युत्तरार्थं वेदेति भाष्यं व्याचष्टे तत्रेति। एतज्ज्ञाप्यविवरणार्थं प्रजापतिर्वा इति भाष्यं व्या
चष्टे तदिति। कुत इति प्रश्नभाष्यं पूर्वप्रकृतसूत्रस्थकृतिशब्दोक्तहेत्वनुसंधानार्थत्वेन व्याख्यातुमाह इत्थमिति। वाक्ये
त्युत्तरभाष्याशयं व्याचष्टे तत्रेति। विध्येकवाक्यत्वं विनार्थवादतानवसायात् विधिविरोधान च भासेपि स्तुतिनिंदाज्ञा
नानुत्पत्तेर्न विधिजन्येन ज्ञानेनार्थवादजन्यस्य ज्ञानस्य बाध्यत्वलक्षणं विध्यर्थवादयोर्बलाबलं किंतु विधायकस्य

पद वाक्यपते

पविध्येकवाक्यत्वात्स्तुत्यर्थवादो निषेधरूपविध्येकवाक्यत्वात् निंदार्थवाद इति विध्येकवाक्यत्वानुसारेणार्थवाद
स्वरूपावधारणात् लक्षणां तत्र विरोधकारणकत्वाभावात्तत्र मुख्यप्रश्नाद्वावापेक्षं अतो जर्त्तिलयवाग्वा वा जुहुयादि
त्यादेर्मुख्यस्याप्यर्थवादस्य पयसाग्निहोत्रं जुहोतीत्याद्युपसंहारस्थविध्यनुरोधात् पयोहोमस्तुत्यर्थवादत्वाद्यवधा
रणां युक्तं इह श्रौतार्थज्ञानाद्बाध्यबाधकत्वलक्षणां बलाबलमालोच्यते तत्र विरोधहेतुकत्वात् मुख्यप्रश्नाद्वावापेक्षं
न विध्यर्थवादपदस्थत्वालोचनाद्विपरीतमवतीत्याशयः। यदि तु विध्यर्थवादत्वनिबंधनमेव बलाबलं वाच्यमित्या
ग्रहस्तत्पश्चान्नेन स्वर्थवादेषु तदस्त्वित्युतिशयार्थमाह यद्वेति। मुख्यत्ववद्विध्युद्देशत्वस्याप्यंगगुणाविरोधन्यायाद्ब
लीयस्त्वं हेतुतान विरुद्धेत्याशयः। पौरस्त्येष्वर्थवादेषु स्वंगत्वाद्दौर्बल्यं कस्मान्न भवतीत्याशंक्याह यद्वेति। विरोधा
वस्थायां श्रुतस्य विध्युद्देशस्य स्वार्थपरत्वेऽर्थवादानन्वयापत्तेः सार्थवादस्य च स्वयमप्ररोचकत्वेन केवलस्यापर्यवसा

अभिधार्थानामभिधार्थादति
मीमांसानतेषु लवादिन पद्भि
धारमेद्रुतोऽस्य प्रवृत्तिर्द्वा
धन्यापि धारपन्नत्त्वापास्य
पद्धतिलिखत्यादयाज्ञपाउ
[illegible] वादिर्वेति पठेत्

नहि [illegible] आग्नावैष्णवस्य नियमेनाग्नीषोमीयविकारत्वाभावे विकल्पेन पौर्णमास्यमावास्यातंत्रप्राप्तिः [illegible] आम्नानानंतरं नियमेन पौर्णमासीतंत्र [illegible]

मा॰ भ॰ ६ नादलब्धात्मकस्य बाधकत्वानुपपत्तेर्मुख्यत्वेनार्थवादस्यैव बलीयस्त्वाद्विध्युद्देशगतत्वेष्टृगादिशब्दानां दौर्बल्यमित्या
शयः। आग्नावैष्णवमेकादशकपालं निर्वपेत्सरस्वत्याज्येन यजेतेति श्रुते मुख्यस्याग्नावैष्णवस्य विकल्पेनाग्नीषोमी
येंद्राग्नविकारत्वात्पौर्णमास्यमावास्यातंत्रप्राप्तेस्तेनैव नैराकांक्ष्यात्ताभ्यां तस्य सारस्वतस्योपांशुयाजविकारत्वहेतु
कपौर्णमासतंत्रनियमापत्त्वेन्निर्द्दिष्टादशाधिकरणोक्तरूपतेइहत्वैकवाक्यत्वप्रतीतेरुपक्रमसमाम्नेणानैराकांक्ष्याभाव
त्नतेन पौनरुक्त्यं शंकनीयं। यद्युक्ता ताभिश्छिंद्याददक्षिणेन यजेत यदि पतिहन्त्रीं सर्ववेदसेन दक्षिणेनेति श्रुते द्वयोः क्रमे
णाभिच्छेदे पूर्वनिमित्तकः प्रयोगः कार्यः परनिमित्तको वेति संदिह्य पूर्वनिमित्तस्य मुख्यत्वाद्बाधकत्वं पूर्वपक्षयित्वा
पूर्वबाधं विनोत्तरात्मलाभानुपपत्तेर्वैकृतेत्यः पदार्थेभ्यः प्राकृतानां प्राकृतपदार्थवत् पूर्वदौर्बल्यस्य प्रबलत्वस्य सूच्यमाण रा॰ म॰
त्वात् मुख्यस्यार्थवादजन्यस्य वेदत्वानस्य पाश्चात्यविध्युद्देशजन्येन ज्ञातज्ञानेन बाध्यता युक्तेत्याशंकते न नु वेति। ७ त्य ६

यथाक्रमं [illegible] तेनैव नवेति

यास्तेकुशा बाध्यंते नेरूर्वाः

न्त्यस्योत्तरज्ञानस्य विरोधिपूर्वज्ञानबाधं विनोत्पत्त्ययोगेन बाधकत्वादेकवाक्यस्थानां च पदानामन्योन्यज्ञानानपेक्षज्ञा
नोत्पादकतायामेकवाक्यत्वभंगापत्तेरन्योन्यसापेक्षज्ञानोत्पादकत्वावसायात् पूर्वपदजन्यज्ञानविरोधिनो ज्ञानस्यो
त्तरेणापदेनानुत्पादितस्य बाधकत्वानुत्पत्तेर्नात्र पूर्वदौर्बल्यन्यायः संभवतीत्याशयेन परिहरति। नेत्यादिना। श्लोकं व्या
चष्टे ये हीति। पूर्वपदस्योत्तरपदाननुरोधस्य नित्यत्वे एकवाक्यत्वविघातात् एकवाक्यस्थेष्वपि पूर्वदौर्बल्यं कस्मान्न भवती
त्याशंक्याह पूर्वप्रतीतं चेति। जातस्याब्धेस्यादिवद्विधेयत्वाभावेन पूर्वप्रतीताद्विधेयविषयात् अनधिकत्वात् पूर्वप्रती
तवेदरूपाविधेयविषयत्वाभावेन च पूर्वप्रतीताननुगुणत्वादनपेक्षितत्वेनाप्रतिपाद्यतया बली यस्मान्नाशंकितुम
न्या पि शक्येत्याशयः। सामान्यमप्यमुक्ता प्रकृतेयो जयति। तदिहेति। वेदानां विधेयविषयत्वस्य पूर्वप्रतीतेर्विधेयमात्रापेक्ष
णात् तज्जातस्यान्वयायोगेनाप्रतिपाद्यत्वान्न बाधकतेत्यर्थः। वेदानामर्थवादाद्विधेयविषयत्वप्रतीतौ विप्रदेशाकीर्त्तनमन

न्या॰भा॰ र्थकं स्यादित्याशंक्याह । अर्थवादस्त्वेवं विधेति । वेदानां विधेयविषयत्वं विधेयस्तैव वचेत्यर्थवादास्तं देहे विषयत्वनिर्णायस्यापि
८ स्तुद्देशकीर्त्तनाधीनत्वात् । यद्यपि वेदोऽर्थवादाद्विधेयविषयतयाभातीति तथापि निर्णायार्थं विस्तुद्देशकीर्त्तनीयइत्याश
यः । भाष्यं व्याख्याति । सूत्रार्थमुपसंहरति तस्मादिति । न्यायदर्शनोक्तेर्य्योदर्शनवाचित्वेन व्याप्त्युक्त्यर्थत्वमंगीकृत्य वेदे
व्या[illegible]पकत्वेन हेतुलक्षणाव्याप्तत्वस्यान्यत्वात् । नक्रमादीनां लक्षयितुं शक्तः स एव त्वहंगादिभिर्व्याप्यत्वेन हेतुलक्षणायु
क्तेः शाक्योलक्षयितुमित्यन्यथा स्वयं सूत्रव्याख्यां सूचयितुमाह वेदस्येति । वेदाव्यभिचारानृक्रमादीनामङ्गाद्युक्तिमात्रेणा
प गादिरूपवेदावयवप्रतीतिसिद्धेः । तन्न क्रमणार्थत्वे वेदोक्तिरनर्थिका तस्मादहस्य ऊलो वेदइत्येवमादिमध्यमपदलोपिस
मासत्वेनैव वेदाद्युक्तिर्व्याख्येयेत्यपपनेन ग्रंथेन सूचितं । अर्थवादादेवच वेदानां विषयोद्देशादि विषयत्वप्रतीतिसिद्धे राम
श्चैवं स्वामात्रार्थत्वेन वेदाद्युक्तौ नामनुवादप्रायत्वादनुवादस्य वचनमयुक्तमन्यर्थत्वेन व्यावष्टे तेनेति । तस्मादिति सूत्रार्थो ८

१ वादानां चलक्षणाद्धेतिदर्शनाद्विध्युद्देशस्यानामपिक्रमाद्युक्तीनां लक्षणायाद्युक्तिरविरुद्धेति व्याख्यांतरं सूचयितुमाह यथाचेति । यस्मादिति भाष्यं सकलं १

पसंहारभाष्यं व्याचष्टे तस्मादिति ॥ ॥ लिंगाच्च ॥ अग्निः प्रातरित्याद्यृक्छब्दस्पलक्षणायैव वेदे प्रयोगादलिंगत्वमाशंक्याह
लक्षणापि वेति । त्रिषु पादेषु ह्यैवेदो ऋक्छब्दं च संकीर्त्य वेदैरिति चतुर्थपादे बहुवचनेनोपसंहरतीति कृत्वा वेदवचन
मृक्छब्दं दर्शयतीत्येवं लिंगत्वोपपादनार्थं ह्यावित्यादि भाष्यम् मुख्यपादद्वयस्थ वेदसंकीर्तनस्यादावुपन्यासेन मुख्यत्वात्पू
र्ववोदनाल्लोकवदित्यस्यापि प्रतिषिद्धधर्मसमवाये भूयसां स्यात्सधर्मत्वमित्यस्माद्भिन्नाधिकरणात्पासमसंख्याविरोधवि
षयत्वमंगीकृत्याल्पस्यमुख्यत्वेपि भूयोनुसारित्वसूचनात् चतुर्थपादानालोचनेपि ऋक्छब्दस्य यजुर्वेदसामवेदशब्दसाहच
र्यात्तु वेदविषयत्वज्ञानं भवति बहुवचनान्यथानुपपत्त्याहुतदेव दृढीक्रियत इत्येवं व्याचष्टे त्रिष्वेव तावदिति ॥ तथा बाध्येता
स्मन्ने वस्तुतरां प्रयुंजत इति पूर्वपक्षवार्त्तिकोक्तं ऋगादौ वेदप्रयोगमनुभाषात्पूर्वं परिहरति यस्त्विति ॥ धर्मोपदेशस्त्र
मसंबद्धपदद्वयवाक्यापत्तेः स्वस्थानादुत्कृष्य त्रयी विद्याख्याव्याचतद्धि दीतिसूत्रं तावत्तत्र बलीयसो शाखान्तरस्थेन प्रयोगेणादिशब्द

भा·भ नांलक्षणा। वत्निसिद्धेः दुर्बलत्वो त्किंकृप्रयोगोपन्यासानर्थक्यादप्युक्तमाशंक्योपपादयि[illegible]तुमाह यदि वेति। यस्न पूर्वं प्रयो
८ गमुपपादयति कथमिति। पंचविंशब्राह्मणप्रथमप्रपाठके महन्मेवावदित्यादियजुःपाठात् छंदोगानां जातत्रयजुष्ट्वं
त्रयीविद्याशब्दस्य वेदविषयत्वेपि ऋगादिशब्दानां किमायातमित्याशंक्याह तदिति। सूत्रार्थमुपसंहरति तस्मादिति॥
व्यतिक्रमे यथाश्रुतीति चेत्॥ ॥पक्षद्वयेपि लिंगेनोद्देश्यानां मुख्यत्वयोः ऋगादिशब्दरूपश्रुतिसंबंधितयेव प्रयोज्यत्वाद्वेद
विहितपदार्थधर्मत्वपक्षे यजुर्वेदविहितत्वेन ऋचामुच्चैष्ट्वादाव्यतिक्रमे यजुर्वेदविहितत्वेनोपांशुत्वप्राप्तावपि ऋग्वेदविहित
त्वेनोच्चैस्त्वस्यापि परिहार्यत्वात् वेदाख्यश्रुतिविहितत्वनिमित्तस्योपांशुउच्चैर्वप्रयोगस्य पाक्षिकत्वात् यथात्वापत्तेः तात्तधर्म
त्ववोविततेस्त्वपि चेति। नाप्यव्याख्यातपूर्वपक्षसूत्रार्थानुभाषणार्थत्वेनैतत्सूत्रव्याख्यार्थमथेति भाष्यं व्याचष्टे अनुभाषणे राम
ति॥ ॥न सर्वस्मिन्निवेशात्॥ ॥ऋग्वेदविहितानां यजुषां यजुर्वेदपाठमात्रेणोपांशुत्वे यजुर्वेदविहितानां वर्णं ऋग्वेदपा ८

ठमात्रेणोच्चैस्त्वे सति विधिविरोधाद्दोषः स्यात्सर्वस्मिंस्त्व आतेयजुर्जाते च ऋग्वेदविहिते उच्चैस्त्वनिवेशाद्यजुर्वेद ~~[illegible]~~
~~पांशुत्वे यजुर्वेदविहितानां सर्वासां [illegible]~~ विहिते चोपांशुत्वनिवेशादेकवेदविहितस्य धर्मद्वयसंबंधाप्राप्तेर्नदो
ष इत्येवं सूत्रव्याख्यार्थं नैष दोष इत्यादि भाष्यं व्याचष्टे न पाठमात्रेणेति। करोतेर्विध्यनभिधायित्वात्कथं वेदविधेयतेति चेत्याशं
क्य वेदस्य कर्तव्यत्वज्ञापनरूपकरणत्ववाचिन्या तृतीयया विधायकत्वाभिधानात्करोतेर्विध्यभिधायकत्वोपपादनार्थं प्रमाणे
नेत्युक्तं। एवमपि वेदद्वयविहितेऽग्निहोत्रादौ विकल्पो परिहार्य इत्याशंक्याह यदि त्विति। भूयस्त्वेनोभयश्रुततात्पर्येनन्यायेन
ग्निहोत्रस्य याजुर्वेदिकत्वावगतेः सर्वे वास्य बर्हिष्यं सर्वैः परिगृहीतं य एवं विद्वानग्निहोत्रं जुहोतीत्यार्थ्वेदिकस्य विधेरुदयु
कालत्वलक्षणगुणविध्यर्थं प्रकरणोज्जीवनार्थत्वावसायान्नोच्चैस्त्वोपांशुत्वयो र्विकल्पापत्तिः विशेषानवधारणेन तु विकल्पो
पदोष इत्याशयः॥ ॥वेदसंयोगान्न प्रकरणेन बाध्येत॥ उच्चैस्त्वादिविधानस्य ज्योतिष्टोमप्रकरणे श्रुतेर्वेदाधिकारत्वे प्रक

मा॰भ रणबाधापत्तेः ज्ञाताधिकारः स्यादित्येवं प्रकरणं चेति भाष्यव्याख्यानं तं सूत्रार्थं यदुक्तमिति भाष्येणानुभाष्य तत्परिहारार्थं लिङ्ग
९ वेदसंयोगाद्ध्व्येदादिविहितत्वलक्षणात्सर्वस्मिन्ज्योतिष्टोमव्यतिरिक्तेपि क्रतावुद्धेस्त्वादिनिवेशः प्राप्नोति न प्रकरणेन बाधि
तुं शक्य इति कृत्वा यस्त्रकरणं बाध्यते स न दोषः वाक्येन प्रकरणबाधस्य युक्तत्वादित्येवं सूत्रव्याख्यार्थं वेदेति भाष्यस्य ष्ट
त्वादव्याख्या एवेदसंयोगात्सर्वस्मिन्निवेशं प्राप्तं न प्रकरणानुरोधिनोद्धेस्त्वादिधर्मा बाधेतेति द्वितीयांतविपरिणाततन्निवे
शान्वयं गीकारेण धर्म इत्यध्याहाराधिक्येनैव सूत्रव्याख्यामभिप्रेत्य पाठांतरमुदाहरति बाधेतेति वेति। पूर्वपाठे प्रथमांततत
या निवेशशब्दविपरिणामः॥ ॥धर्मोपदेशाच्च न हि द्रव्येण संबंधः॥ ॥क्रत्वर्थमत्वेनोपदिष्टस्योद्धेस्त्वस्य पुनः सामधर्मत्वे
नोपदेशाच्च न गादिशब्दैर्वै दोधिक्रियन्तु इत्येवं सिद्धांतसूत्रोक्तप्रतिज्ञातुर्थगेण सूत्रपूरणा सूचनार्थं लिंगाच्चेति सूत्रानं राम
तरमेतत्सूत्रं कृतमपि पूर्वपक्षनिरासार्थत्वेन सूत्रस्थानादुत्कृष्ये दानीं व्याख्येयमिति सूत्रयति तुं ज्ञाताधिकारपक्षं क्रत्व ९

र्मत्वोपदेशेनैवोद्भेदस्यापि सामधर्मत्वसिद्धेः सामान्वयोऽनवकॢप्त इत्येवं पूर्वपक्षनिरासार्थमिदं सूत्रशेषं व्याचष्टे ज्ञातेति
।प्रजापतिस्त्वदयादिमं ज्ञानां सामान्याश्च्यग्रहितत्वात् तदर्थं सामसाम्यमप्युद्भेदस्योपदेशो भविष्यतीत्याशंकते अत्र हि केति। जातध
र्मपक्षे प्रकरणानुग्रहसंभवेनाप्राकरणिकेषु प्रजापतिस्त्वदयादिषूद्भेदस्य विधियोगात्तादर्थ्यं न संभवतीति परिहरति। नेति।
तादर्थ्याभ्युपगमेऽप्यल्पविषयत्वान्मंदप्रयोजनत्वात् प्रत्ननिरित्याह अल्पेति। वेदोऽधिक्रियत इत्यनुषंगेण सूत्रपूरणां सूत्रवयव
धिकरणार्थमुपसंहरति तस्मादपीति॥ ॥गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः॥ ॥उद्भेदस्यादेर्वेदधर्म
त्वे स्थिते प्रसंगादुत्पत्तिवेदधर्मत्वं प्रयोगवेदधर्मत्वं वेत्यत्र [illegible] चिंतेति परमतेन तावदधिकरणं वर्णयन् स्त्राधानसाम्नो विधा
नस्य वेदांतरीयत्वाभावादनुदाहरणत्वमाशंक्य कृत्वाचिंतात्वसूचनपूर्वं संदेहं पूर्वपक्षं चाह इदानीमिति। उत्पत्तिवेदधर्मः
कर्तव्यः प्रयोगवेदधर्मो वेति संदेहार्थं विदध्यपदेशनिबंधनत्वादुद्भेदस्यादिधर्माणां प्रत्याम्नायस्थव[illegible]स्थितोत्पत्तिविधिविष

भा॰भ यस्य च साक्षाद्धेतुव्यपदेशोपपत्तेः प्रयोगविधिविषयत्वस्याङ्गेषु प्रधानद्वारत्वेन साक्षाद्धेतुव्यपदेशहेतुत्वायोगात्प्र
१० योगस्य च ऋग्वेदे विधानं तस्य तद्धेतुधर्मः स्यादिति वदता यत्सामवेदिकं वारवन्तीयादि वाक्ये विधीयते सामवेदे नैव तत्साक्षा
क्रियते यजुर्वेदे तु तद्रूप्रधानद्वारेत्येवं शर्ववपक्षभाष्यव्याख्या सूचिता। अङ्गप्रधानयोर्भिन्नवेदविहितत्वरूपे व्यतिक्रमे त्वङ्गेष्व
रूपनिबन्धनधर्मानुरोधेन प्रधानद्वारप्राप्तस्य धर्मस्य बाधः तत्कृतो व्यतिक्रमः कार्यः प्रधानद्वारधर्मानुरोधेन वाङ्गरूपनि
बन्धनस्येति संदेहे प्रधानसाद्गुण्यार्थत्वादङ्गधर्मानुष्ठानस्य प्रधानद्वारधर्मानुरोधेनाङ्गरूपनिबन्धनधर्मव्यतिक्रमस्य न्या
य्यत्वात्प्रधानद्वारकः प्रयोगवेदसंयोगः क्रियत इत्यनेन विवक्षितमित्येवं सूत्रव्याख्यां सूचयन् सिद्धान्तमाह इतीति। गुणो
ङ्गरूपतः प्राप्तस्य धर्मस्य बाधनमित्यर्थः। भाष्येपि अङ्गरूपनिबन्धनो धर्मो गुणोक्तोक्तः। प्रधानद्वारको मुख्योक्तः॥ अपरो राम
क्ते विरोधिधर्मान्तरार्थतामवश्यकर्तव्यतां न्यासूचयन्नाक्षोकं व्याचष्टे अवश्यमिति। तदर्थत्वादिति हेतुव्याख्या व्याख्यातं कृतइ १०

त्यादिन्यायं ख्यापयिष्टे। तथाहीति। प्रधानद्वारप्राप्तेनैव धर्मेणांगस्यापि साद्गुण्यसिद्धेरस्तु पेत्यवादमात्रेणाप्ययपीत्युक्तं। अप्रधा
नस्यत्यादिन्यायं सिद्धान्तोपसंहारार्थत्वेन व्याचष्टे तस्मादिति। प्रयोगविधेरप्रधानवाक्यैकवाक्यत्वलक्षणांगप्रधानविशिष्ट
भावनाविषयत्वेन कल्प्यत्वादन्याम्नातत्वेन वेदत्वानुपपत्तेर्यजुर्वेदेन यत्प्रयुज्यते तद्रूपांश्चिति शास्त्रार्थीयोगात् यजुर्वेद
नयद्धितियुज्यते तद्रूपांश्चिति शास्त्रार्थावगतेः सामवेदिकोत्पत्तिविधिविहिते प्रधानसामसु तद्रूपांशुत्वप्राप्तेर्नोच्चैस्त्वबाध
कतानुक्तेति पूर्वपक्षाशयं दूषयितुमुपन्यस्यति नचेति। प्रधानेन सहांगानामेकदेशकालकर्तृत्वसिद्धयेंऽगानि नुविधा
नत्वात्प्रधानेनोपदिश्येरन् तस्मात्स्यादेकदेशत्वमित्यकादशाधिकरणसिद्धान्तसूत्रे प्रकाराख्यविधानरूपेतिकर्तव्य
तात्वेनांगानामितिकर्तव्यतांकारूकरणाख्यप्रधानविषयेण दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिप्रयोगविधि
नोपदेशस्यवक्ष्यमाणत्वात्प्रयोगविधेरपि वैदिकत्वोपपत्तेः करोतेश्चानुष्ठानात्मकप्रयोगवाचित्वाद्यजुर्वेदेन यत्प्रयुज्य

मा॰भ
११

तेतद्रूपांश्चितिशास्त्रार्थोपपत्तिरित्याशयेनपरिहरतिनैतदिति।प्रधानेनसहैकवेदविहितानामंगानांवाक्यैकवाक्यत्वापन्नवाक्य
संग्रहात्मकमहावाक्यार्थभूतानामंगप्रधानविशिष्टभावनाविषयवैदिकप्रयोगविधिप्रयोज्यत्वसंभवेपिवेदांतरविहितानामेक
वाक्यत्वायोगात्ननतत्प्रयोज्यत्वोपपत्तिरित्याशंकांनिरासार्थंविधेस्त्वेकश्रुतित्वात्तत्पर्यायविधानात्नित्यवत्श्रुतभूताभि
संयोगादर्थंनतुगुणपत्त्वानेर्यथाप्राप्तंशास्त्रार्थोनिवीतवन्नस्मात्सर्वप्रयोगोपपत्तिःस्यादित्येकादशाधिकरणांतरसिद्धांतसू
त्रंपठतितदर्थेतिसांगप्रधानप्रयोगविधेरेकप्रधानप्रयोगविधिश्रुतिनिबंधनत्वेनपर्यायेणाकांक्षादाविकल्पेनसर्वांगानांवि
धानाद्वागतेर्नित्यवच्छ्रुतानांचतथाभूतानांश्रुत्यादिप्रमाणोपनयलक्षणसंनिधानाविशेषा[illegible]त्संनिकर्षविप्रकर्षाभावादे
णप्रधानाद्यावगतेरतिशीतोपाय्यपरिमाणत्वेनचप्रधानोपकाररूपेणार्थेनसर्वेषामपेक्षितत्वात्युगपत्प्राप्तेर्यथाप्राप्ते राम
चशास्त्रार्थेविकल्पायोगात्निवीतान्कृत्विजःप्रवर्तंतीतिसर्वर्त्विजांनिवीतवद्युगपत्प्राप्तस्यांगसमूहस्यसर्वस्यप्रधानप्रयो ११

गविधायिशास्त्रविषयत्वावगतेः सर्वांगप्रयोगे फलसिद्धिः स्यादिति समस्तांगप्रयोगोपपादनायैक[illegible]कांडाम्नाननिमित्तैक
वाक्यत्वाभावेप्यंगप्रधानानामन्योन्यापेक्षावशात्सर्वांगानुगृहीतेन प्रधानेन फलं साधयेदित्येवं वाक्यैकवाक्यत्वकल्पनया
संनिकृष्टविप्रकृष्टानां सर्वेषामंगानां प्रधानप्रयोगविधिप्रयोज्यत्वस्य वक्ष्यमाणत्वात् वेदांतरीयाणामप्यंगानां प्रधानप्रयो
गविधिप्रयोज्यत्वोपपत्तिरित्याशयः। अतः प्राधान्ये प्रयोगविधिप्रयोज्यत्वेनांगानां वेदांतरोत्पन्नानामपि प्रधानप्रयोगवेदप्रयो
ज्यत्वात्सांगस्य प्र[illegible]धानस्य याजुर्वेदिकत्वेनाधानसामान्यमुपांशुत्वोपपत्तिरित्युपसंहरति तस्मादिति। स्वयमेव तत्प्रधानवदाम्ना
नमपि यजुर्वेदप्रयोज्यत्वादुपांशुत्वप्राप्तेः प्रधानद्वारत्वायोगाद्दूलीयस्त्वान्नयुक्तेत्याशंकते एवं तर्हीति। प्रधानोपकारित्वेनांगा
धर्मस्याप्युपांशुत्वस्य प्रधानधर्मत्वाभ्युपगमे तद्देश्यस्यापि प्रधानधर्मत्वापत्तेरपरिहार्यात्तुल्यबलतेत्याह अथेति। साक्षादं
गविधाय्युत्पत्तिविध्यालोचने साम्नां याजुर्वेदिकत्वाभावादुपांशुत्वाप्राप्तेः प्रधानस्य वस्तुसांगस्य यजुर्वेदसंबंधात्साम्नामुपांशु

त्वप्राप्तेः दुर्निराकरात्प्रधानद्वारतेतिपरिहरति॥ उच्यत इति॥ श्लोकं व्याचष्टे यदिहीति॥ आधानसाम्नोत्पन्नेर्वस्तुतो याजुर्वेदिक
त्वेपि सामवैदिकत्वं कृत्वा चिंतारंभादित्याशयः॥ सांगं कुर्यादित्युपबंधस्य याजुर्वेदिकत्वेन सांगस्योपांशुत्वावधारणात्स्व
रूपेणवांगस्योपांशुत्वसंस्पर्शाभावे सांगस्योपांशुत्वायोगात्स्वरूपेण संस्पर्शापत्तिरित्याशंक्य तेनन्विति॥ सांगविधौ विशे
षतोत्वेनांगविधानाद्विशेषणविधेश्च विशिष्टविधिकल्प्यत्वेनानाम्नानाद्वैदिकत्वाद्युपपत्तेराधानसाम्नो याजुर्वेदिकत्वा
भावेनोपांशुत्वाप्राप्तेः स्वरूपांशुत्वरूपो धर्मः प्रधानद्वारेवांगानि प्राप्नुवन्नंगधर्म इत्येवं कथ्यते तेन त्वंगस्य स्वरूपेणोपांशुत्वापा
दिकाय जुर्वेदसाद्याद्वोदनात्स्वीतिपरिहरति नेति॥ अतो नोपांशुत्वोच्चैस्त्वयोस्तुल्यबलत्वेत्याह तत इति॥ बलीयस्त्वेप्युपांशुत्व
स्य विरोधात्सावेबाधकत्वायोगाद्विरोधाति क्रमो न्योक्तः प्रधानद्वाराग्रयांगं प्राप्तस्य धर्मस्य बाधे साक्षात्प्रधानवैगुण्यापत्तेरं
गवैगुण्यापद्वारस्य तु प्रधानवैगुण्यस्याद्वैस्त्वबाधेपि तुल्यत्वेन नो पांशुत्वस्य बाधकत्वं संभवतीत्याशंक्य प्रधानेनेहीत्युक्तं॥ उपांशु 

त्वस्यसांगप्रधानधर्मत्वादंगेषूपांशुत्वबाधेसाक्षात्सांगप्रधानवैगुण्यापन्नेस्तद्वैस्वर्यस्यत्वंगधर्मत्वान्नतद्बाधेनसाक्षात्प्रधानवै
गुण्यानापन्नेर्वैषम्यमित्याशयः॥उच्चैस्त्वोपांशुत्वयोर्वेदविशेषविधेयत्वोपलक्षितकर्मांगत्वेनविधानादुत्पत्तिवेदविधेयत्वस्य
चांगेषुतत्प्रद्वारत्वात्साक्षात्प्राप्तेःप्रयोगवेदविधेयत्वस्यतुप्रधानद्वारत्वाद्विपरीतंबलाबलमितिप्राप्त्यात्मिकत्वाद्व्यपदेशाध
र्मत्वामितिवार्त्तिकोक्तंपूर्वपक्षाशयंदूषणायानुसंधत्तेनवेति॥वैषम्येपिनोच्चैस्त्वस्यबाध्यतेत्यपिशब्दार्थः॥प्रधानवैगुण्या
पादकत्वेनसाक्षात्प्राप्तेर्बलीयस्त्वेहेतुत्वाभावात्शीघ्रावगतिर्हेतुत्वमात्रंवाच्यंतत्रचबाधाधिकरणन्यायाद्दौर्बल्यमेवापादय
तीत्याशयेनदूषयतिसत्यमिति॥प्रधानवेदस्वरबलीयस्त्वाभ्युपगमेऽनिष्टापत्तिंशंकतेनन्विति॥वचनेनन्यायबाधादनिष्टा
पत्तिंपरिहरतिसत्यमिति॥वाचनिकस्वरांतरलाभमेवप्रश्नपूर्वमुपपादयितुमारभतेकथमिति॥सामिधेन्यनुवचनादी
नांऋग्वेदेध्याधानमंत्रादीनांचयजुर्वेदेविधानात्पूर्वपक्षन्यायेननानावेदस्वरप्राप्तौसिद्धांतन्यायेनबाधितायांविशेषवि

माम घयेणमंत्रादिवचनेन प्रधानेष्वसामान्यवचनप्राप्तेणांस्तुत्वबाधपूर्वमंगेषुतद्बाध इत्यर्थः ॥ प्रधानानामिष्ट्याख्यानांप
१३ शुबंधाख्यानांचदर्शपूर्णमासविकृतीनां ~~[illegible]~~ दार्शपौर्णमासिकेमंत्रादिष्वरत्रयंचोदकात्प्राप्तंबा
धित्वाप्रत्यक्षयाजुर्वैदिकप्रधानप्रयोगवचनलक्षणोपदेशवशेन प्रधानविधायियजुर्वेदनिमित्तोपांशुत्वस्वरप्रसक्तौ
नामवेदविहितेष्वंगेषुज्ञातृभिःकार्याणीतिवेदोपदेशात्सर्वत्र वृद्धेद्वात्प्रवृत्तेयथोपदेशंस्युरितिसप्तमपादांत्याधिकरण
सूत्रेणपूर्वपक्षयित्वातद्ग्रहणाद्वाधधर्मःस्यादधिकारसामर्थ्यादिध्युक्तःशेषइत्यनेन प्रवृत्तेसूत्रस्यपूर्ववत्त्वं निर्दिष्टप्रकृ
त्युपस्थापितप्राकृतधर्मपरामर्शिनंतत्तुचोदकप्राप्तान्यंगान्यधिकृत्यवैकृतप्रयोगवचनप्रवृत्तेस्याधिकारमात्रंचोद
कवाचिनमभिप्रेत्यप्रयोगवचनेनप्राकृतधर्मग्रहणात्प्राकृतानांचधर्माणांचोदकसामर्थ्येननानात्विकृर्तकाणामेव राम
प्राप्तेःप्राकृतीयचोदकप्राप्तनानात्विकार्तकधर्मयुक्तःस्रुपमादिःस्यातयस्मुज्ञात्रादिःसामान्यसमाख्यानिमित्तत्वातऋग्युक्तः १३

स्यार्थवर्तित्व.रुक्ता
दृष्ट वदृगीतिवर्णी
तिनवप्रा

कर्त्तासशेषेप्राकृतधर्मव्यतिरिक्तेकंटकेवितोदनादावपूर्वेंशेपेनांगेभविष्यतीतिसिद्धांतयिष्यमाणत्वात्तन्नेवन्यायेनात्रा
पिचोदकवलीयस्त्वात्काम्येष्टिव्यतिरिक्तानांदर्शपूर्णमासविकृतीनांसांगानांचोदकप्राप्तंमंद्रादिस्वरत्रयंकाम्येष्टीनांतु
यत्नाथर्वणीर्वैकाम्याइष्टयस्ताउपांशुकर्त्तव्याइतिकाम्यशब्दवाच्येप्रधानेविशेषवचनेनोपांशुत्वविधानादंगमात्रेस्वरत्रयं
युक्तमित्याहातथेतिज्योतिष्टोमांगभूतानांतुदर्शपूर्णमासविकृतीनांदार्शपौर्णमासिकेमंद्रादिस्वरत्रयेचोदकात्प्रा
प्तेप्रयोगवचनेनबाध्यमानेतदूहणादेतिवक्ष्यमाणेनचोदकवलीयस्त्वेनोज्जीवितेज्योतिष्टोमस्ययाजुर्वेदिकत्वेनो
पांशुधर्मकत्वात्प्रकृतत्वादिष्टेःसोमेपहविःस्यादित्यष्टमाधिकरणपूर्वपक्षवक्ष्यमाणस्यप्रकृतोपकारकत्वाद्दर्शपौर्णमा
सिकानांधर्माणांग्रहणास्यकृत्स्नविधानात्त्वपूर्वत्वमितिसिद्धांतेतिराकरिष्यमाणत्वेनाभावाद्दार्शपौर्णमासिकमंद्रादिस्वर
त्रयाशंकानुपपन्नेःतदंगभूतानांदर्शपूर्णमासविकृतीनामपिप्रकृतसिद्धांतन्यायेनज्योतिष्टोमातोपांशुत्वप्राप्तिंबाधि

भा·भ
१४

त्वादीक्षणीयाद्युद्देशेनविशेषवचनविहितेषुस्वरेषुतेनैवन्यायेनसांगानांप्राप्तेषुमंद्रंप्रातःसवनेचरंतीत्यादिविशेषवचनैःस
वनविभागेविहितानांमंद्रादिस्वरकारणगुणानांज्योतिष्टोमधर्मत्वावधारणात्सवनबहिर्भूतानांसर्वेषांज्योतिष्टोमांगा
नामपिगुणानुरोधव्यतिक्रमन्यायेनप्रतिस्वंसांगंप्रयोगंत्रेधाविभज्यप्राकृतेमंद्रादिभिराउपभागांतत्वाद्यनादरात्सर्वथाप्या
प्याभावेपित्रेधाविभक्तयज्ञभागधर्मत्वेनतुल्यानांमंद्राद्युच्चारणानांप्राप्तौयत्किंचिदितिवाक्यात्सर्वेषांदेकात्म्याद्वागुणं
स्तुतत्वप्राप्तौप्रधानमात्रवाचिनाशब्देनोद्दिश्ययावत्यावाचाकामयीततावत्यानुब्रूयादित्यादिस्वरविशेषविधानात्प्रधान
मात्रेस्वरविशेषास्तदंगेषूपांशुत्वेतिच्छवस्यादेकेनमंद्रयाउपभागांतमित्यादिविभागेनप्राप्तस्यप्राकृतस्यस्वरस्यगुणानु
रोधव्यतिक्रमन्यायेनज्योतिष्टोमगतोपांशुत्वप्रसंगाद्धारितस्यसवनविभागविहितेनमंद्रादिस्वरेणगुणानुरोधव्यतिक्र राम
मन्यायादेवदेकप्राप्तेनोभयानुग्रहायाउपभागांताद्विविभागेनसांगदेकप्रयोगंत्रेधाविभज्यप्रयोज्यत्वयावगतेनप्रति

प्रसवः प्राकृतस्य वा द्वारस्यांगभूते देवत्वरूपे प्राप्तस्य प्रधानतः प्राप्तेन सवनविभागद्वारेणाबाधात्सवनविभागतुल्यदेवत्वविभा
गाश्रयणान्मंत्रादिद्वारकस्योद्धारणस्य संपादनं कार्यमनूबंध्यादिष्वपि सवनविभागद्वारद्वारप्राप्तमंत्राद्युच्चारणाविशेषाद्देव
णाद्याख्याता इत्याह एवमिति। तथा ज्योतिष्टोमस्येति तु पाठे तथा प्राप्ते सतीत्यध्याहार्यं। ततो ज्योतिष्टोमस्येति पाठस्तु सुगमः॥
यत्किंचिदित्यनेनैवोपसत्त्वपुपांशुत्वप्राप्तेरुपांशूपसत्स्विवस्यानर्थक्यप्रसंगात्तत्परिहारायोपसद्विषयत्वेनोपांशुत्वो
पसंहारार्थत्वावगतेर्द्वितीयाद्यंगेष्वपुपांशुतानयुक्तेत्याशंक्योपसंहारे यत्किंचिदिति वीप्सार्थप्रतीतिविरोधापत्तेर्द्वि
तीयाद्युत्तरप्रशंसार्थत्वेन स्वार्थवत्त्वोपपत्तेर्नोपसंहारार्थत्वसंभवतीति सूचनायोपांशूपसत्स्विति तु उक्तं वीप्सार्थयत्किंचि
दित्यनेन सर्वव्यापित्वोक्त्योपसंहारानर्थत्वं सूचितं सवनीयादिष्वपि सांगप्रयोगं त्रेधा विभज्य मंत्राद्युच्चारणानां देवत्वन्यायेनो
चितत्वाद्दतिक्रमेणानूबंध्यादिषु देवत्वन्यायातिदेशो न युक्त इत्याशंक्याह सुत्याकालेति। मंद्रं प्रातःसवने चरंतीत्यादिवा

मा·म
१५

कपष्ठानांसवनोक्रीनोसोमयागावयवत्वाविशेषेनसवनीयादिवाविलाभावाद्यथादीक्षणीयाद्युद्देशेनविहिताःग्रहान्नदंगेषु
नभवंतियथावादीक्षणीयादिषुसुत्याकालबहिर्भूतेषुज्योतिष्टोमांगेषुसवनसंबंधेनविहिताग्रहानभवंतितथासुत्याका
लेष्वपिसवनीयादिषुज्योतिष्टोमांगेषुसवनसंबंधेनविहिताःग्रहाननवंतीत्याशंकतेतनुसवनशब्दानामिति।सवनाख्यासवना
नामाधारत्वप्रतीतेःकर्ममध्येऽनुष्ठानादेवचकर्मणामाधारत्वप्रसिद्धेःकर्मकालेयानुष्ठानंविनानुष्ठानस्यकर्ममध्यत्वासि
द्धेःसवनकालेयत्स्युरुत्पत्तेतत्रसर्वत्रमंडूकादिविध्यवगमात्सवनीयादिष्वपियथासवनमेवग्रहान्नवंतीतिपरिहरतिनेति
।एतदेवव्यतिरेकतोवयत्तस्त्रयथाक्रमंश्लोकद्वयेनविवृणोतियदीति।यत्प्रातःसवनस्यांगंचरंतितन्नंडमित्यंगाद्यतिरेक संपंच:
जनितषष्ठ्याश्रयणात्सवनानामंत्रप्रतीतिरभिमता।।सवनानामाधारत्वमात्रविवक्षायांत्वेकत्रशाख्ययाज्यानुवाक्यादिरूपा राम
णांसवनानांमंत्राणांसवनाख्यसोमयागावयवभूतानांतरसमुदायावयवत्वेनसवनेष्योत्पत्तभेदाभावादाधेयत्वानुपपत्ते १५

र्वपर्यायात्तः सवनेचरंतीत्यादिवद्बहुसवनंप्रत्याधेयत्वेनाक्रांतत्वान्नयथासवनंमंद्रादिस्वरःस्यादित्याशंकतेकेचिदि
ति।व्यतिरेकतोप्ययतस्तथयथाक्रमंश्लोकद्वयेनश्लोकंव्याचष्टे।आधारइति।षष्ठीप्रयोजनस्यमंद्रादिस्वरलाभस्यषष्ठ्यंताव
पिसवनाधारत्वाविशेषेणास्तोत्रादिष्वप्यवगतत्वेनसंभवात्स्तोत्रादौमंद्रादिस्वराभावापत्तिरूपोदोषोनास्तीतिपरिहरति।
इतीति।इत्युक्तेपरिहारोभिधीयतइत्यध्याहारेण।योत्वं।त्रतंतभेदाभावेपिआधेयत्वंदृष्टांतेनोपपादयन्श्लोकंव्याचष्टेय
थाहीति।अंगानांगविषयाद्वयोक्तिः।याज्यानुवाक्यादिसंनिपत्योपकारिमंत्रव्यतिरिक्तस्यत्वारादुपकारिणःस्तोत्रादेःक्र
त्वस्यमंत्रजातस्यतिःफलसवनांगत्वायोगेनज्योतिष्टोमांगत्वावसायात्सवनीयाद्यंगांतरवत्स्तोत्राद्यपिप्रत्याधारत्वमात्र
सवनानांनतुप्रधानेतितिसवनीयादितुल्यतावगंतुंशक्येत्याहयदिचेति।सुत्योक्याज्ज्योतिष्टोमोविवक्षितः।सवनांतर्ग
तिसवनीयादौस्तोत्रादौचयथासवनस्वरमुपपादितमपूर्वंस्तोत्रादौस्वरांतरप्राप्तिक्रमोक्तिपूर्वमुपसंहरतिनानेति।सवनी

सा॰भ॰ याद्दिश्याहन्निशंका। निरासाय समस्तोक्तिः। सुत्याकालीनान्यंगानीति मध्यमपदलोपी समासः। सर्वेष्वेकाहाहीनसत्रेषु ज्योति
१६ ष्टोमिकस्वरन्यायमतिदिशति एतेनेति। सर्वत्रवावस्नि कस्वरलाभस्सुत्यादनेनानिष्टापत्तौ परिहृतायामुवैकृचेत्यादिविहित
स्यनानावेदस्वरस्य निर्विषयत्वं शंकते कृपुनरिति। को विषय इत्यर्थः। उपनादावोज्ञात्रादिसमाख्याप्राप्तस्य कर्तुः प्राकृतांग
व्यतिरिक्तापूर्वांगविषयत्ववत्तन्नानावेदस्वरस्यापूर्वमंगं विषयो भविष्यतीति परिहरति उच्यत इति। एतदेव विवृणोति य
दिति। येषां प्राकृतानामंगानां प्राकृतस्वरस्य कृत्यां विकृतौ चोदकेन प्रयोगवचन बाधात् प्रयोगवचनं च दिनांगप्रधानध
र्मप्राप्तेरपूर्वांगत्व वेदस्वरोपपत्तिसूचनार्थं प्राकृतेत्युक्तं। प्रयोगवचनस्याबाधाभ्युपगमेपि वेदांतरीयप्रधानप्रयोगवि
धेर्वेदांतरीयांगैकवाक्यत्वायोगाद्वेदांतरीये त्वंगिप्रधानत्वानुपपत्तेः वेदांतरीयेंगे प्रधानवेदस्वराप्राप्तिसूचनार्थं वेदांत
रीयेतीत्युक्तं। सविषय इति पूरणीयं प्राकृतेष्वंगेषु चोदकप्राप्तेन स्वरेण प्रयोगवचनप्राप्तस्वरबाधेप्यपूर्वांगे चोदकाप्र राम १९

दृष्टेः प्रयोगाख्यवचनत्वात्स्वरबाधायोगात् वेदांतरीयैस्त्वांगवाक्यैः प्रत्येकैकवाक्यत्वाभावेप्यंगांगिनामन्योन्यापेक्षाकल्पितैक
वाक्यत्ववशाद्वेदांतरीयेप्यंगे वेदांतरीयप्रधानप्रयोगविधिप्रवृत्त्युपपत्तेः गुणमुख्यव्यतिक्रमन्यायेन वेदांतरीयेष्वपूर्वांगप्रधान
द्वारस्य स्वराख्यस्य धर्मस्याभावान्न सविषयत्वमित्येवमेतमपि पक्षं दूषयति न त्विति। समानवेदस्थं तदंगं प्रधानस्वराविरोधित्वस्वरवेना
बाध्यस्वकीयस्वरत्वान्नानास्वरविधिविषयो न त्विति पक्षांतरं शंकते एवं तर्हीति। कुटकवितोदनादेः प्रधानवेदविहितस्याद्यन्तः
शेष इत्यनेन विषयत्वकल्पनादत्रापि समानवेदविहितस्यैव विषयता युक्तेत्यत्र स्ववनार्थं शेषेष्वित्युक्तं। अंगेनानावेदस्वरस्य
प्रधानस्वराविरोधित्वं वदता प्रधानेवश्यं नानावेदस्वरविधिरभ्युपगंतव्य इत्यापाद्य गुणमुख्यव्यतिक्रमन्यायात्प्रधानद्वारैवा
पूर्वांगे तद्वेदस्वर~~स्य प्रधानस्वराविरोधित्वं वदता प्रधानेवश्यं नानावेदस्वरविधिरभ्युपगंतव्य इत्यापाद्य गुणमुख्यव्यतिक्रम~~
~~न्यायात्प्रधानद्वारैवापूर्वांगे तद्वेदस्वर~~लाभोपपत्ते रंगविषयस्वरविधेर्नैःफल्यप्रसंगात् सोपि विषयो न भवतीत्येवमेतमपि

मा॰भ दूंदूषयति। सोपीति। प्रधानमेव तर्हि यथा प्रकृतिप्राप्तशेषांगकं सूक्तसमानतवेदस्वरापूर्वांगांतरकं विषयोस्त्विति पक्षांतरं शंकते
१७ तदेवतर्हीति। दार्शपौर्णमासिकेन मंद्रया ज्याभागांतमित्यादिना ज्योतिष्टोमिकेन वा मंद्रं प्रातःसवन इत्यादिना स्वरेण तस्य
प्रधानस्यावरुद्धत्वात् सोपि विषयो न भवतीत्येवमेतमपि पक्षं दूषयति नेति। प्रधानस्यात्मीयवेदस्वरभावे प्राकृतस्य स्वर
स्य प्राकृतांगमात्रान्वयित्वेनापूर्वांगान्वयानुपपत्तेः प्रधानद्वारा गोस्वरलाभायोगात् अंगमेव तर्हि विषयो न विष्यतीत्यपूर्वांग
विषय एवाद्येव पुनः प्रत्यवतिष्ठते न तर्हीति। प्रधानद्वारापूर्वांगस्य नानावेदस्वरप्राप्त्यभावेपि यः प्रधानस्य प्रकृतस्य प्राकृतस्व
राख्यो धर्मः तस्यैव देशादिवत्प्रयोगांगत्वेन प्रकृतिवद्विकृतावपि प्रयोगवचनाश्रयत्वावगतेरपूर्वेप्यंगे भावान्नांगं नानावे
दस्वरविधिविषय इत्येवं परिहरति नैवमपीति। प्राकृतस्य स्वरस्य वचयज्ञनागधर्मतया देशवदुपांशुत्वमिति नवमाधिक राम
रणन्यायेन स्थितत्वाद्यज्ञनागपतितस्यापूर्वस्याप्यंगस्य प्राकृतस्वराख्यधर्मलाभोपपत्तेर्नापूर्वमंगं नानावेदस्वरविधिविष १७

स्यप्रयोजनवत्तरत्वादर्थवादस्य तत्परत्वाद्युक्त[illegible] २

यइत्याहापि वेति न तु स्वरावा एष यज्ञस्य तस्माद्यत्किंचित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरंतीत्युदाहृत्य उपांशुतामग्नीषोमी ३
यप्राग्भाविपदार्थधर्मो यज्ञभागधर्मो वेति संदिह्य यत्तशब्दत्यागेन विष्णुदेशस्य प्राचीनशब्दान्वयप्रतीतेर्यज्ञभागधर्मत्वं
पूर्वपक्षयित्वा तस्मादित्यादिपदद्वयव्यवधानेन यज्ञस्य प्राचीनमित्यन्वयायोगात् प्राचीनस्य चोद्देश्यत्वेन विशेषणानपेक्षत्वाद्य
ज्ञभागस्यैवैकत्वात् यत्किंचिदिति बहुविषयवीप्सार्थप्रतीत्ययोगात् प्रत्नेर्यज्ञस्य तत्सरेत्यन्वयेपि क्रत्वर्थत्वेनार्थवत्त्वोपपत्तेः॥
पदार्थधर्मत्वस्य तस्मिन्नधिकरणे सिद्धांतयिष्यमाणत्वात् कथं तेन न्यायेन मंडादेर्भिन्नस्य यज्ञभागधर्मता स्थितेत्याशंका नि
रासार्थं निबंधे तूक्तं। यत्किंचित्प्राचीनमित्यत्र यज्ञशब्दान्वयाद्यज्ञभागधर्मत्वेन निराकरिष्यमाणोपि प्रातःसवनादिशब्दाना
यज्ञभागवाचित्वादाद्यभागांतादिशब्दानामप्येकवचनांतत्वे नांगमायज्ञभागवाचित्वावगतेः नवमाधिकरणपूर्वपक्षन्या
येन मंडादेर्यज्ञभागधर्मतावसीयत इत्याशयः॥ अग्नावत्स्तरणाबर्हिषः प्राक्तूलवनादिधर्मतन्वयवत्स्य पूर्वस्यांगस्य प्राक्

मा॰भ॰ तत्स्वरानन्वयशंकानिरासायापूर्वस्याप्यंगस्य प्राकृतयज्ञभागारब्धकार्यारंभकत्वेनाप्राकृतकार्यबर्हिःक्लृप्तत्वं निरस्तं नाना
१८ वेदस्वरस्यातिर्विषयत्वशंकामुपसंहरति तस्मादपीति। ज्योतिष्टोमे च नानावेदस्वरनिवेशे सतीति वाक्यबलीयस्त्वादन्यत्र निवे
शेपि नात्वं तं ज्योतिष्टोमप्रकरणाम्नानानर्थक्यापत्तिर्ज्योतिष्टोमनिवेशाभावत्वात्वं तानर्थक्यं स्यादित्याह प्रकरणेति। शं
काद्वयस्यापि परिहारं प्रतिजानीते अत्रेति॥ सर्वेषां दर्विहोमानामपूर्वत्वेन प्राकृतधर्माग्राहित्वात्प्रायशश्च यजुर्वेदिक
त्वादंगभूतेषु प्रधानद्वारस्वरप्राप्तावपि स्वतंत्रेषु दर्विहोमेषूपांशु यजुषेति विधानमर्थवदित्याह उपांश्विति। एवं निर्विषय
त्वशंकापरिहारेपि ज्योतिष्टोमेतिवेशाभावात्प्रकरणाम्नानानर्थक्याशंकापरिहृता स्यादित्याशंक्य ऋक्सामवेदस्वरवि
धानयोर्नैमित्तिके ज्योतिष्टोमांगे काम्ये वानंगे पि ज्योतिष्टोमांगाश्रितत्वादंतःक्रतुप्रयोगे सार्थकत्वात् ज्योतिष्टोमप्रक
रणाम्नानार्थवत्त्वोपपत्तेस्सत्वाह च यदि स्यापि प्रकरणाम्नानमर्थवद्भविष्यतीति सूचनार्थस्तावच्छब्दः। इतरयोरपि स्वरयोः का राम १८

स्यनैमित्तिकेषूत्पत्तिशिष्टांगेष्वनिवेशेन सविषयता। अंतर्ज्योतिष्टोमप्रयोगाद्युपकरणाम्नानार्थवत्त्वेत्याह ऋक्सामेति। वेदवि
भिन्नस्वरलक्षणार्थाविदोक्तिः। काम्यस्याग्न्याश्रितत्वलक्षणार्थांगत्वोक्तिः। तत्र विशेषविहितमंद्रादिस्वरसंज्ञावात्तनार्थवत्त्वेत्या
शंकातिरासपूर्वमेतदेव विवृणोति मंद्रमिति। सामवेदविहितं पवमानग्रहमहावीरभेदनिमित्तकर्मणामुदाहरति यथेति। एकप
दार्थात्मकत्वेनाभिमर्शनस्याग्नीषोमीयवत्त्वे धाविनामायोगात्सुत्याकालत्वाभावेन च सवनीयादिवद्यथासवनमेकस्वरत्वा
योगात्प्रधानद्वारस्वरप्राप्तेरात्मीयवेदस्वराबाधा उदाहरणत्वाविरोधेप्यमंत्रकत्वेस्वरविधेयत्वायोगापत्तेर्मंत्रप्रतीकग्रह
णं नैमित्तिकस्यार्थ्यादिकस्य काम्यस्य चान्यविषयस्योदाहरणस्य सूचनायादिशब्दः। यजुर्वेदविहितत्वनिमित्तमुपांशुत्व
मप्येवं विषय यजुर्वेदविहितैकपदार्थात्मककाम्यनैमित्तिकाग्रविषयमुदाहार्यमित्याह एवमिति। सुत्यानन्तरकालेषु चानुबं
ध्यादिषु ज्योतिष्टोमीषु गोमध्येवषट्याग्न्भूतानां सामानामादिशब्दोक्तानां चानुबंध्यादिसाम्नां परिसामाख्यानां परितःसाम
नीति त्रुत्पन्नावषट्यादिप्रयोगाद्बाह्यत्वावगते रवषट्यादिप्रयोगविधिविधेयत्वाभावेनावषट्यादिद्वारस्वरप्राप्त्यभावात्सा

पछन्दोग्निप्रातःसक्त्रपीचार्तिलि ५

मा॰भ
१९

न्त्रा ज्योतिष्टोमांगत्वाभावेनचाग्नीषोमीयादिवत्स्ववनविभागस्वरेणाविषयतयाग्रहणाभावाद्बाधकाभावेनस्वरूपतः प्रा
प्तोयथावेदमेवस्वरासुक्तइतिकृत्वानानावेदस्वरोपदेशाद्दुद्वैस्यसिद्धेः नानावेदस्वरोपदेशस्यनिर्विषयत्वंप्रकरणाम्नाना
नर्थक्यंवानास्तीत्याशयेनोदाहरणांतरमाह तथेति । सवनविभागविहितमंत्रादिस्वर~~स्यभावाद्दुद्वैस्यसिद्धेः नानावेदस्व~~
~~रोपदेशस्यनिर्विषयत्वंप्रकरणाम्ना~~लकृणार्थां सवनोक्तिः । सुत्योत्तरकालत्वात्प्राचीनभागविहितोपांशुत्वप्राप्त्यावेसव
नविहितेनचस्वरेणाविषयतयाग्रहणाभावान्मंत्रादिस्वरभावेपारिशेष्याद्दुद्वैस्यसिद्धेः वेदस्वरविधानर्थक्यमाशंक्याहा
न्यथाहीति । परिसामसुप्रयोगसमवायिस्वराभावेदीक्षणीयादिपरिसामस्वपिदीक्षणीयाद्यंगप्रयोगसमवायुपांशु
त्वंनस्यादित्याशंक्याह दीक्षणीयादीति । दीक्षणीयाद्विपरिसाम्नां दीक्षणीयाद्विप्रयोगानंतर्गतित्वेप्यग्नीषोमीयप्राची
नत्वाविशेषादुपांशुतेत्याशयः । प्रवर्ग्यसाम्नामपि तस्याग्नीषोमीयप्राचीनत्वात्स्ववर्ग्यप्रयोगवहिर्भावाद्यप्रवर्ग्यस्वरो द्वै राम
स्वाप्राप्ते पांशुत्वंस्यादित्याशंक्याह प्रवर्ग्येति । कारणविभक्त्यासांगस्यो द्वैस्यविधानात्प्रवर्ग्यप्रयोगवहिर्जविपिचपशु १९

रू॰

प्रयोगाद्वहिर्भूतस्यदीक्षाकालस्ययूपछेदनस्यपश्वंगत्वाविरोधवत् प्रवर्ग्यसाम्नोःप्रवर्ग्याङ्गत्वाविरोधादुक्तंस्यादित्याशयः
।प्रासंगिकंपरिसमाप्यसांगप्रधानसंयोगादुपांशुत्वंदृष्टान्तयतइत्येतेनयच्छन्दत्वमेवंतर्हिस्वयमेवाग्नानांयाजुर्वैदिकत्वादु उपसं
पांशुत्वंगुणेनप्रधानधर्मविरोधद्वारमितिशंकानिरासमुपसंहरतिआधानेति।शंकानिरासोपसंहारत्वसूचनार्थंस्त्र
शब्दः।परमतेनवर्णितमधिकरणंआधानसाम्नांयजुर्वेदविहितत्वेनवेदांतरीयत्वाभावादुदाहरणत्वायोगेनतावदूष
यतियइति।सामवेदेनैतक्रियतेयद्वारवंतीयादिभिरितिभाष्यवारवंतीयादिसामरूपंयज्ञानंपठ्यतेतत्सामवेदइति
करोतेःपाठार्थत्वाद्वारवंतीयादिभिरितितृतीयायाश्चेत्थंभूतलक्षणार्थत्वात्स्वरूपपाठमात्रंसामवैदिकमपेक्ष्योपचारात्साम
वेदेनक्रियतइत्युपन्यासोनतुलिङ्गादिप्रापारात्मिकायांविधानक्रियायांकारकहेतुसामवेदमभिप्रेत्येतिस्वमतेनोदाहरणं
समर्थयितुमाहतत्रेति।पाठस्यशास्त्रसिद्धस्यांगकत्वेनोत्पादकत्वोपचारोपपत्तेःकृत्यादत्रवाविकरोत्पर्थत्वसंभवसूचनायोत्प
त्त्युक्त्यासिन्नुच्चारणेनपाठोविवक्षितः।एवंपूर्वपक्षभाष्यव्याख्ययोदाहरणसमर्थनेसतिपाठवेदधर्मोबलीयान्नुविधिवेदध

सा·भ र्मैवेतिर्विंतापत्तेः गुणोद्दरूपतः प्राप्तमुख्यद्वारत्वाप्तयोर्विरोधे विंताभावात्सौत्रैगुणमुख्यशब्दैर्नोपपद्येयातामिति कृत्वाक
२० स्याविक्लामवेदशाखायामप्राधानसाम्नां विविकल्पने नोदाहरणं समर्थनीयमिति परमते नाहतत्त्विति। उत्पन्नमुत्पत्त्या त्रशब्द
भिद्यंजकत्वेनपाठस्योत्पादकत्वोपचारात्पाठो विवक्षितः। विनियोगो न्यायावविशिष्टोऽसाधारणो नियोग इति व्युत्पत्त्या सर्वां
गप्रधानसाधारणप्रयोगविधिविध्यावृत्त्यर्थमुत्पत्तिविधिः प्रात्यात्मिकानेकपदार्थविषयत्वेनासाधारणत्वाद्विवक्षितः॥ सा
मवेदशाखायामाधानविधौ सत्यपि छेत्तभेदाभावाद्यजुर्वेदे पुनः क्रत्वानर्थक्यापत्तेः। शाखांतरीयविधिवद्वेदांतरीयाणा
मप्येकार्थानां विधीनां विकल्पेन विधायकत्वाभ्युपगमे विकल्पेन पूर्वपक्षकरणायत्तेरनुदाहृतसामवेदिकविधिविकल्प
नायोगात्कैत्तसमर्थनानुपपत्तेः कृत्यन्नि विनियोगबलाबलस्यैव विचारणीयत्वादपठितानां मंत्राणामज्ञातस्वरूपत्वाद्धिति राम
योगाशक्तेः पाठस्य विनियोगं प्रत्युपकारित्वात् पाठाख्यामुत्पत्तिं गुणशब्देन मुख्यशब्देन च पाठं प्रत्युपकार्यत्वलक्षणा २०
प्राधान्यात्प्राथम्याद्वोत्पत्तिविधिर्विवक्षितत्वाधिकरणं वक्ष्यमाणप्रकारेणारंभणीयमिति परमतनिरासपूर्वकं स्वमतेन

धिकरणावर्णनं प्रतिजानीते तदात्विति॥ कीदृगारभ्यत इत्यपेक्षायां विषयसंदेहपूर्वपक्षसिद्धांतान्सहेतुकान्संक्षेपेणा
ह यत्विति॥ भाष्यमपि पाठवेदस्वरानुरोधेन विधिवेदस्वरं विधिवेदस्वरानुरोधेन वा पाठवेदस्वरमिति जिज्ञासायां पाठवेदस्वरो
बाधयितुं युक्तो विधिवेदस्वरस्यानुग्रहीतुं युक्त इत्येतावद्गुणोऽन्यथा पाठवेदस्वरो मुख्योऽन्यथा वा विधिवेदस्वरो विवक्षित इत्येवं व्या
ख्यायशेषं विधानार्थत्वात्पाठस्य विधीयमानस्यैव च मंत्रस्य स्वरापेक्षत्वाद्विधानकालावगतस्यैव स्वरस्य यदृक्सामवेदा
त्वां विधीयते तदुच्चैः प्रयोज्यं यजुर्वेदेन यद्विधीयते तदुपांश्वित्येवं चोदनार्थत्वावगतेः यदृक्सामवेदयोः पठ्यते तदुच्चैः यद्य
जुर्वेदे पठ्यते तदुपांश्वित्येवं विधानाभावात्पाठकरणेन विधिविषयाख्य गुणायुक्तः संपद्यतामित्येतदर्थमुच्येत पाठे प्रवर्त्तते त
त्रचेत्स्वरचोदनार्थाज्ञानात्पाठवेदस्वरप्रवृत्त्या विधिवेदस्वरहानिर्भवति ततश्चोदिताकरणात्फलमेव नोत्पन्नं भवति विधिवेदस्व बा
रानुष्ठानात्तु पाठवेदस्वरहानौ तस्यावादितत्वान्न मंत्रार्थहानिः गुणाश्च सामगानं पाठात्मकं प्रधानमाधानं आधानांगत्वेन विधी
यमानं तस्य च याजुर्वेदिकत्वादुपांशुता गुणः स सामवेदाख्यपाठवेदधर्ममुच्चैस्त्वं बाधत इत्येवं व्याख्येयं॥ भाष्यानुसाराद्व्यतिक्रमश्च

द्वंद्वाध्वाविनं संदेहोत्यर्थत्वाद्वाविरोधवाचिनमभिप्रेत्य नियममात्रेण वपूर्वपक्षं कृत्वा स्वयंव्यभिचारवाचीव्यतिक्रमशब्दो
नियमविकल्पाभावपूर्वपक्ष इत्येतावतान्यथाधिकरणं वर्णयति अथ वेति सामान्यतो वेदांतरीयाणामात्रविषयत्वादस्या
धिकरणस्य कृत्वा चिंतया प्रधानसामोदाहरणमित्याशयेनोक्तमेव परमतेनाधिकरणार्थं स्वरूपतो दूषयितुं स्मारयति अथ
वैवमिति स्वरूपतोंगविधायिना वेदेनांगस्य स्वरविधानुपलक्षणा बलवत्प्रधानद्वारांगविधायिना वेति चिंतायां गुणोस्वरू
पतो धर्म इत्यनेनैवत्यायेन प्रधानद्वारांगविधायिनेति निर्णयात्स्वात्यात्मिकवेदधर्मबाधेन प्रधानवेदधर्मः कार्य इत्य
धिकरणार्थोस्य पदेशद्वारोक्तः प्रधानद्वारांगेप्राप्तेन धर्मेण स्वरूपतः प्राप्तस्य धर्मस्य बाधप्रक्षेप्रक्षेप्तो ज्योतिष्टोमे वेदांत
रीयेषु स्तोत्रशास्त्रादिगेषु तद्ग्रहण इति तच्छब्दपरामृष्टप्रात्यात्मिकवेदसमाख्याप्राप्तकर्त्तारं विकृतौ चैनत्स्यन्नसुत्यादित
बलीयस्त्वप्रात्यात्मिकचोदकप्राप्तकर्त्तारं बाधित्वा प्रधानवेदसमाख्यानकर्तृप्राप्तेः स्थितसिद्धांतबाधप्रसंगात्तेनैवं चिंता
युक्तेत्याह एतस्मिन्निति यथा चोदकप्रापितांगग्राहित्वात्प्रयोगवचनस्य चोदका^द्दुर्बल इति सूचनार्थं चोदकबलीयस्त्व

दुर्बलस्तथा प्रत्यात्मिकोपदेशरूपविधिप्रापितांगग्राहित्वात्ततोपि १

व्युत्पादनार्थः। सूत्रेचोपन्यासः प्रात्यात्मिकांगविधेरतिदेशस्य च प्रापकत्वेन बलीयस्त्वात्प्रकृतौ। विकृतौ चांगावेदसमाख्या
तकर्तृग्रहणे तु स्वरस्याप्यंगवेदसमाख्यातस्यैव ग्राह्यत्वापत्तेः प्रधानस्वरग्रहणंनयुक्तमित्याहाथेति। करोतेः प्रयोगवा
चित्वाद्यजुर्वेदेन यत्संयुज्यतेतेनोपांश्विति प्रयोगविधिविहितस्योपांशुधर्मकत्वप्रतीतेर्यजुर्वैदिकप्रयोगविधिविहि
तत्वेनोपांशुत्वेबाधानसामान्यंयुक्तमिति यत्प्रयोगवचनपरिगृहीतत्वादन्यत्राप्युत्पन्नानामंगानां यत्रैव प्रधानं तत्रैवाधिरि वि
तिवार्त्तिकेनोक्तं तन्निरासस्सूचनार्थश्चकारः। प्रधानप्रयोगविधिविधेयत्वेंगानामेकादशे वक्ष्यमाणेपि दर्शपूर्णमासाभ्यां
स्वर्गकामो यजेतेत्यादेः केवलस्यांगवाचिशब्दरहितत्वेनसांगप्रधानप्रयोगविधानाशक्तेः करणविभक्तिनिर्देशात्सांग
त्वावगमेप्यंगविशेषानवगतेः सांगत्वस्य चैकांगसाहित्यमात्रेणाप्युपपत्तेः सर्वांगोपसंहारानादरप्रसंगात्तदुक्तौ दिस्पष्टत्वाया त्या
रपर्यंतांगप्रापकसर्वप्रमाणसु हि तस्यैव दर्शपूर्णमासादिवाक्यस्य सांगप्रधानप्रयोगविधायित्वावगतेः प्रधानविधेः
सांगप्रधानप्रयोगविधायित्वोद्बोधस्य च पदांतरस्य पारार्थ्यादारभ्यातेयोपि मन्यते वाक्यं प्राधान्ययोगेन वाक्यार्थं चापि स

भाम २२ वनामित्याख्यातस्य वाक्यत्वोद्योषवत्प्राधान्यमात्रेणोपपन्नेस्माहृशस्य वानामात्रत्वेनोहादेर्मेः ब्रवहेदत्वाभावाद्यनुर्वे
देन यत्प्रयुज्यते तदुपांश्विति वाक्यार्थानुपपन्नेर्यजुर्वैदेन यद्विधीयते तदुपांश्वित्येष एव वाक्यार्थो युक्त इत्याशयः॥ क
रोतेश्च विधिवाचित्वेन तद्विशेषप्रयोगविधिपरत्वे सत्युत्पत्तिविधिपरत्वायोगेनांगो स्वरूपतो धर्मो प्राप्तेस्तस्य प्रधानद्वार
प्राप्तेन धर्मेणास हबलाबलचिंता न युज्यते तदुत्पत्तिविधिवाची करोतिः प्रयोगविधिवाचीवेति चिंतायां तु गुणो स्वरूपतो ध
र्म इत्यादि ग्रंथा उपपत्तिः॥ तस्मात्पाठार्थः करोति विधानार्थो वेति संदिग्धो त्पादनार्थत्वात्करोतेः पाठस्य च शब्दाभिव्यंज
कत्वेनोत्पादनत्वोपचारोपपन्नेर्विधानेत्वपं तात्रसिद्धवाचकशक्तिकल्पनायोगात्पाठार्थः करोतिरिति पूर्वपक्षयित्वा पाठे
वेदस्य करणत्वायोगाद्धेत्वादितृतीयाभंगापत्तेः करोतेः कृत्लक्षणयाक्रियाप्रवृत्तिहेतुभूतविधानार्थत्वोपपत्तेः॥४॥ कोत्र
विधिर्विवक्षित इति विशेषापेक्षायां प्रयोगविधेः कल्पि... न वेदविशेषव्यपदेशायोगस्योपपादितत्वात्कार्यज्ञाते॥ धि राम
कारः स्यादिति वाधिकारज्ञानस्य प्रयोगविध्यधीनकार्यज्ञानपूर्वकत्वाभिधानेनाधिकारविधेः प्रयोगविधिपूर्वकत्वाव २२

सायात्सुतरां वेदविशेषव्यपदेशायोगाद्वा तेरुत्पत्तिविनियोगविध्योरन्यतरो विधिविशेषो विवक्षित इ त्य ~~अस्यैषैवाविवक्षि~~
गतेरुत्पत्तिविधिं करोति साम जस्यात्तु [illegible] स्येव वचप्राथम्यादुत्पत्तिविधानार्थः करोतिरिति सिद्धांतयितव्यमिति सूत्रयन्न किं
करोतेः पाठार्थत्वात्पाठवेदधर्मः कार्यो विधानार्थत्वाद्वा विधिवेदधर्म इत्येषैव व्याख्या शोभनेत्याहातइति। पाठाख्यामु
त्पत्तिं करोति वाच्यां पूर्वपक्षमित्येत्यसिद्धांते विधानं करोति वाच्यमस्ति प्रत्यकिन्तु त्पत्तिवेदधर्मः कार्यो विधिवेदधर्मो वेत्ये
षविचार इत्यर्थः। वाच्यचिंता न पेक्षिता आद्येनैवकारेणाध्यावर्त्तिता। एवं च साम वेदप्रठितत्वादाधानसाम्नायुक्तोदाह
रणात्तेत्याह तथा चेति। गुणानुष्ठानेन मुख्यः स्वगुणाः कथ्यस्यादित्यादि सोध्यानुसारेणांगप्रधानधर्मविरोधार्थत्तयागु
णामुख्यव्यतिक्रमशब्दः कस्मान्नव्याख्यात इत्याशंक्याह यदि लिति। अपौनरुक्त्यासंभवः संप्रधारणीयं इति सूडुत
योक्तः॥ भूयस्त्वेनोभयश्रुति॥ ज्योतिष्टोमस्यानेकवेदविहितत्वात्स्वरविकल्पो यजुर्वेदमात्रविहितत्वाद्वोपांशुत्वैवे
ति भाष्योक्ता चिंता वाचनिकस्वरांतरावरुद्धत्वेन ज्योतिष्टोमेनानावेदस्वरस्यानवकाशादयुक्तेत्याशंक्याग्निहोत्रं जुहो

मा·भ
२३

त्तितीययजुर्वेदे सर्ववा अस्य बर्हिष्यं सर्वपरिगृहीतं य एवं विद्वानग्निहोत्रं जुहोतीत्यथर्ववेदे च श्रुतं तस्याग्निहोत्रस्य ज्ञापकोक्तो
दाहरणानादरेणोदाहरणतामनंतराधिकरणसिद्धांतोपजीवनेन वेसिंहद्धांतकरणानंतरसंगतिं सूचयितुमाह
९ इदानीमिति। यानि नानावेदेषु श्रूयंते तानि केन वेदेन व्यपदेष्टव्यानीत्युदाहरणानां दर्शयितः। उद्वेश्योपांशु
त्वयोः पाठवेदधर्मत्वेऽनेकवेदपठितस्यैकस्य मंत्रस्यानेकव्यपदेशानिराकरणाशंकेः सिद्धांतायोगात्प्रसंगाद्विधिवेद
धर्मत्वेऽनंतराधिकरणेनोक्तेऽनेकवेदश्रुते केन वेदेन विहितमिति व्यपदेष्टव्यमिति चिंता सिद्धांतसंभवाद्युक्तेत्यनं
तरसंगतिं सूचनायेदानीमित्युक्तं वाक्यीयविनियोगप्रकारचिंताशेषत्वानुलक्षणप्रकरणसंगती पूर्वाधिकरणा
वदस्यापिस्पष्टे निर्गुणपुष्टेनः श्रवणास्यैव वेदांतरस्थस्याप्यश्रेव भेदाभावेन भेदकत्वासंदेहायोगमाशंक्य संदे
होपपादनार्थं द्वितीयश्रवणस्य गुणार्थता भाष्योक्ता ब्रह्मवाक्ये गुणानुपादानाद्वाक्यांतरस्थस्य च गुणस्य वाक्यांतरे राम
णाविधियोगाद्युक्तामाशंक्यारूपत्वेनोत्पादकत्वायोगाद्भेदकत्वानुपपन्नेरनुवादकत्वाभ्युपगमेऽवानर्थक्यापत्तेः २३

प्रकरणे तस्मोत्र शस्त्राद्यं गाङ्गयार्थो वेदान्तरीये विधिरिति स्वचनाया विच्छिन्ने कथं नावेयत्प्रधानस्य पठ्यते अनिर्ज्ञातफ
लं कर्म तस्य प्रकरणाङ्गातेति प्रकरणस्य प्रधानकथं भावात्मकत्वान्मुपगमात्प्रधानानीत्युक्तो व्यपदेशो न्या केन वेदे न वि
हितत्वनिमित्तो धर्मः कार्य इति फलतश्चिन्तोक्ता भाष्ये वैकावधारणान्तं स्वरूपानि श्वयोन्या विकल्पेन पूर्वपक्षकरणाद् तक
दा विद्धिपरीतमिति कदाचित्यदा व्याहारेण पूर्वपक्षबचनं व्यक्तिर्व्याख्येया। यत्रेति भाष्यं चिन्ताप्रयोजनोक्त्यर्थत्वे न व्या
चष्टे तत्रेति। यस्मिन्वेदे स्वरूपेण विधीयते तेन व्यपदेष्टव्यत्वान्न हे द धर्मो न विघ्यतीत्यर्थः। शीरवान्तरवन्नित्यं सर्वेषु वेदेषु
त्पत्ति प्रतीते धर्म विकल्पाशयेत्वे न तावत्पूर्वपक्षभाष्यं परमते न व्याचष्टे किमिति। शारवान्तरवदध्येत्वभेदाभावान्नित्यं सर्वे
षु वेदेषूत्पन्नानर्थक्यापत्तेर्विशेषाभावेनान्यतरत्रोत्पत्त्यनिर्णयात् स्वमते नोत्पत्ति विकल्पार्थत्वेन व्याचष्टे अथवेति
। पूर्वपक्षनिरासार्थत्वेनैवं प्राप्त इति भाष्यं व्याचष्टे एवमिति। यथा शाखान्तरे सर्वत्र नित्यं कर्मोत्पत्ते विरुद्धैकादशाहाद
शकपालत्वादि धर्म विकल्पस्तथा वेदान्तरे ऽध्येत्रभेदाभावेन सर्वत्र नित्यं कर्मोत्पत्त्ययोगात् स्वरारव्य धर्म विकल्पो न युक्त

मा·भ इत्याद्यपूर्वपक्षनिरासेवैधर्म्यदृष्टांतः॥ नित्यवदाम्नानाच्छाखांतरवद्वेदांतरेप्युत्पत्तिविधिविकल्पोनयुक्तइतिद्वितीयापूर्व
२४ पक्षनिरासेसाधर्म्यदृष्टांतः॥ उक्तोनेकवेदस्थविधायकमध्येनित्यमेवैकःकश्चित्कर्मणांविधायकोन्यस्तुप्रकरणेन
गुणान्वयसिद्ध्यर्थइत्युत्तरार्द्धार्थः॥ एवंव्याख्यातार्थंभूयस्त्वेनेत्यादिभाष्यंविशेषनिर्द्धारणहेतूक्त्यर्थत्वेनावतारणापूर्वं
परमतेनतावद्व्याचष्टेसविति॥ एकैकस्यांगस्याकरणनिराकांक्षीकरणाशंकेरंगाभूयस्त्वमितिकर्त्तव्यतेत्याशयः॥ एकै
कस्यांगस्येतिकर्त्तव्यतात्वाभ्युपगमेपियेभूयांसोगुणाःसाबह्वीतिकर्त्तव्यतातस्माद्बह्वीतिकर्त्तव्यतासानिध्यात्व
धर्मानुग्रहार्थंकर्त्तव्यताचोदना॥ लिंगत्वावगतेर्बह्व्येतिकर्त्तव्यतयालिंगभूतयाकर्त्तव्यताचोदनानुमानंयुक्त
मित्येवंपरमतेनैवान्यथाव्याचष्टेयजुर्वेदइति॥ यजुर्वेदेज्योतिष्टोमोत्पत्तावपिकरोतिवाच्यस्यानुष्ठानस्यवेदत्र २५
याधीनत्वादेकवेद[illegible]कार्यत्वव्यपदेशानुपपत्तेरेकवेदाधीनानुष्ठानस्यैवद्विहोमादेर्नानावेदस्वरविषयत्वा
वगमान्नज्योतिष्टोमादौस्वरवितानयुक्तेत्याशंक्याविहितानुष्ठानाराक्षेयजुर्वेदेनयस्मात्ज्योतिष्टोमोविधीयतेतस्मा

नेन क्रियत इत्युच्यत इति करोतेरनुष्ठानहेतुविधिलक्षणार्थत्वाज्ज्योतिष्टोमादेरेकवेदकार्यत्वव्यपदेशो पपद्यत्युक्तमर्थं य
जुर्वेदेनहीतिभाष्यमनुष्ठेयत्वप्रमापकत्वाद्विधेरनुष्ठानहेतुत्वमुपपादयन्व्याचष्टे अत्रस्त्रेति। यजुर्वेदेन ज्योतिष्टो
मस्य कर्तव्यत्वप्रमा क्रियत इति कृत्वा यजुर्वेदेन विधीयमानो ज्योतिष्टोमस्तेन क्रियत इति करोत्यर्थो भवतीत्यन्वयः।
यस्माद्यजुर्वेदेन विधीयते अविहितानुष्ठानाशक्तेश्चानुष्ठेयताज्ञापनरूपस्य विधानाख्यस्य लिङादिव्यापारस्य वेदेन
पुंसि प्रवर्तमाने द्वारतावसीयते तस्मात्तेन क्रियत इत्युच्यत इति मुख्यार्थत्यैव करोतिव्याख्यार्थमेतद्भाष्यमित्येवमन्य
थाव्याचष्टे यद्वेति। कर्तव्यत्वप्रमाकरणाख्येनैव व्यापारेणानुष्ठानमपि यद्वेदाद्भवति तद्वेदेन क्रियत इत्येवं व्यपदिश्यत इ
त्यर्थः। परमतेन भूयस्त्वव्याख्यां दूषयितुमुपक्रमते नत्विति। एकैकस्यांगस्येति कर्तव्यतात्वादिति कर्तव्यताभूयस्त्वं लिंग
मित्येतानावद्व्याख्यापनपूर्वं दूषयति कृत इति। दृष्टान्तेनैतदेवोपपादयति। यथा दृशस्पहीति। दा र्शीति कियोज्यय तित्तथेति
व्याप्तिमात्रापेक्षत्वेन भूयस्त्वानपेक्षत्वान्नायं भूयसां स्यात्तद्धर्मत्वमित्यस्य न्यायस्य विषय इत्याशयः। गुणानां भूयस्त्वेनेति कर्म

द्यंते त्याद्यां व्याख्यां दूषयति नैवं हीति। प्रत्येकं करणोपकारिणामेवांगानामनुपादेयत्वात्संहत्य तानां प्रयोगे न तु संहत्यानामुपका-
रितेत्याशयः॥ एकैकस्यांगस्येति कर्तव्यतात्वेपि वेदांतरस्थप्रधानानुवादस्यानुसंधानक्लेशापादकत्वाद्बह्वंगविधौ च क्लेश-
शक्तो न ह्यशक्तः इति कर्मोत्पन्नं निष्ठांताभ्यां शक्यत्वाशक्यत्वोक्तेः प्रकरणाम्नातस्य मंत्रस्य प्रकरणगत्वेव गते कथं तस्योपक
रिष्यतीत्यपेक्षायां शक्त्यालोचनयानेन मंत्रेणेंद्रमभिदध्यादिति विनियोजकश्रुतिकल्पनावदशय विनियोज्यत्वावगतेर्विनि

का॰ ४९

योऽक्रमशक्यस्याभिधानशक्तिकल्पितयापि श्रुत्या विनियोज्यत्वायोगादभिधानशक्त्या विनियोज्यत्वे शक्य इत्यर्थः। श्लोकव्या
ख्यानं तया शक्तश्चेन्न विनियुज्यते मा विनियोजि न त्ववश्यं विनियोज्यता केनचिदवगतेत्याशंक्याभिधानशक्त्यैव श्रुतिकल्प
नद्वारावश्यं विनियोज्यतावगतेति सूचयितुमाह। न चेति। हेतौ च शतृ। ततोऽभिधानसामर्थ्याच्छ्रुतिकल्पनाद्वारा यो विनियो
गोऽभिमतः स द्वितीयाद्विनियोक्तुं शक्यत्वरूपात् सामर्थ्यात् कल्पयिष्यते समर्थयिष्यते उपपादयिष्यत इत्येतदर्थमभि
धानशक्तिबलेन विनियोक्तुं शक्यत्वं कल्प्यत इति क्रियार्थायां। क्रियायामुपपदे स्थिते तत्र लृट्प्रत्ययेन विनियोगशक्ति
ः कल्प्यत इत्युपपदार्थीभूतविनियोक्तुं शक्यत्वकल्पनक्रियायाः कल्पयिष्यत इति लृट्। प्रसामर्थ्य इति सामर्थ्याद्वाचक
कल्पयत्युपपादनक्रियार्थत्वाभिधानादर्थः। अभिधानशक्तिमात्राद्विनियोगोपपत्तेर्विनियोक्तुं शक्यत्वकल्पना
नर्थिकेत्याशंक्य न प्रथमसामर्थ्यमात्राद्विनियोगोपपत्तिरित्याह। नेति। एतदेवोपपादयति प्रथमेन हीति। पूर्ववा राम
वगतोऽपि विनियोगो द्वितीयं विना न निर्वहतीत्याशयः॥ कृतिलिंगयोर्विवेकमुक्तं स्पष्टयति। अत इहेति। श्रुतो ज्ञातं ४८

त्वरूपेणासत्येवसामर्थ्येमंत्रस्यांगतोच्यते लिंगत्वमुक्तांगत्वंसामर्थ्यमात्रंप्रतीयतेइत्यर्थः। श्लोकं व्याचष्टे। अविद्यमानमे
वेति। ज्ञाततत्त्वरूपेणाविद्यमानमेवाभिहि[illegible]ांगत्वस्यविधानात् कल्प्यमित्यर्थः। तदेतदित्यस्य श्रुत्यादित्रयपरामर्शित्वसू
चनार्थंसामर्थ्यपूर्वकत्वादित्यादिवार्त्तिकेनाभि[illegible]शंकितमपि श्रुतिलिंगाभ्यांवाक्यस्याविवेकंनिरस्यति। वाक्येपुनरिति। सर्वेष्वे
तिभाष्यात् श्रुतिलिंगविरोधोदाहरणे श्रुत्यादित्रयविवेककथनस्यसर्ववाक्येषुविवेक [redacted] नानार्थत्वावगतेर्वाक्य
प्रकरणादिविरोधोदाहरणेषुप्रकरणादिविवेकोपिकस्मात् तत्राप्येनप्रदृष्टःकथितोवेत्याशंक्याह। कथंभावेति। तदावष्ट
इत्यस्मिन्नर्थेविवेचितइति। णिच्प्रत्ययप्रयोगेनकथितइतिवाच्यप्रत्ययानुग्रहार्थोधातुः। आख्यातेर्थेश्रुत्यादित्रयसंकरशं
कानिरासप्रतिज्ञानार्थंतदितिभाष्यावयवंयोजयति। तदिति। श्रुतिवाक्याभ्यांलिंगविवेकोपपादनार्थमिहतावदित्यादि
पदानीत्यंतंभाष्यावयवंयोजयति। तदिति। लिंगश्रुतिविवेकोपपादनार्थंनत्वेवमितिभाष्यावयवंयोजयति। गार्हपत्येपुन
रिति। कापुनरत्रश्रुतिरित्यादिभाष्येणश्रुत्यादिविवेकोक्तेरिंद्र्युदाहरणेश्रुतिलिंगविरोधोपपादनार्थत्वसूचनार्थत्वेनय

दिविति भाष्यं व्याख्यातुमाह इतीति यद्येवमित्यादि भाष्ये शेषत्रयोर्वाक्यत्वात् श्रुतिलिंगविरोधोदाहरणत्वायोगे शंकिते तैने
तत्तच्छ्रवणाङ्गम्यते नापि शब्दान्तरस्य समीप उच्चरितस्य सामर्थ्यमन्वियेनैतत् गम्यते इत्यनेनैन्द्राङ्गताया वाक्यीयत्वस्य श्रौत
त्ववन्निरासेपि न त्वेवमस्यास्तु विसामर्थ्यमालोच्यैन्द्री वाक्यादैन्द्र्या गार्हपत्योपस्थानं भवतीति अनेन गार्हपत्याङ्गत्वस्य लैंगि
कत्वनिरासेपि वाक्यीयत्वानिरासात् वाक्यीयत्वाभ्युपगमे प्रतीतेर्यथा गार्हपत्योपशब्दमात्रात् गार्हपत्यप्राधान्यप्रतीता
वपि ऐन्द्र्यन्वयस्य वाक्याधीनत्वादैन्द्री वाक्ये वाक्यस्य विनियोजकताभ्युपगम्यते तथेन्द्रशब्दमात्रस्य लिंगादिन्द्राङ्गत्वप्रती
तावपि शेषाणां मंत्रपदानामिन्द्राङ्गत्वस्य वाक्याधीनत्वात् केवलस्यैन्द्रपदस्याप्रयोज्यत्वेनाविनियोज्यत्वात् मंत्रेपि वा
क्यस्य विनियोजकताभ्युपगंतव्येत्याशंकोच्छ्रानाद्यथैवेति भाष्येणोभयत्र वाक्यस्य विनियोजकत्वे निरस्ते मंत्रे केवलस्य
पदस्याभिधानशक्तत्वेपि निराकांक्षीकरणासमर्थपदान्तरान्वयं विना संपूर्णव्यवहारानंगत्वेनाप्रयोज्यत्वतया विनियोक्तु
मशक्यत्वात् इन्द्राभिधानशक्तेन्द्रपदैकवाक्यत्वाद्भाव शिष्टानामपि पदानां विशेषणाभिधानद्वारेन्द्रप्रकाशनशक्त्युपपत्तेः प

दृष्टमात्रे च लैंगिकविनियोगस्य पर्यवसानात्प्रकरणे लिंगविरोधाद्वाक्येन कृत्स्नमंत्रविनियोगानुपपत्ते रिंद्रपदसामर्थ्ये
न कृत्स्नमंत्रविनियोगाय पदांतरसाहाय्यमिंद्रविशेषणाभिधानसामर्थ्यसंपादनमात्रे वाक्यव्यापारावगमात् लिंगेनैव कृत्स्नमं
त्रविनियोगसिद्धेर्न वाक्यस्य विनियोजकतेति द्रष्टव्यत्वात् कृत्स्नस्य मंत्रस्येंद्रप्राधान्यमिति भाष्येणोपपादितत्वात् लिंगत्व
मप्रकरणमप्यबाध्यमाणवाक्यस्य विनियोजकत्वनिरासयुक्त्यनभिधानादेवं तर्हि लिंगवाक्ये इति भाष्यस्याप्युक्तः प्रवृत्त्युपस्थानमिति कृ
क्रमेणापरेषां भाष्यव्याख्यातॄणां दूषयितुमुपन्यस्यति। अत्रेति। अत्र पूर्वकमपदं कथं हि नु माहा कृत इति शंकावादिनेवं तर्हि लिं
गवाक्ये इति लिंगशब्देनेंद्रोपस्थानकल्पकस्य प्रमाणस्य लिंगत्वात्प्रकरणमात्रपुनर्वाक्यत्वाभिधानाशंकेऽस्मिन्निरासार्थमय
वेति भाष्यमेवं तर्हीत्यतः पश्चादसंबद्धमित्याशयः। कृतं हि अस्थवेत्ययं ग्रंथो योजनीय इत्यपेक्षायां यत्त्वयद्येवमिति भाष्य
द्वयोर्वाक्यत्वं शक्यते तदभिधीयत इत्यादिना तत्तो गार्हपत्य इत्यते न द्वयोर्वाक्यत्वसंजनवेऽपि श्रुतिलिंगयोर्भावदन्यात्यविवे
कात्सीत्प्रकृते वाक्याद्विवेको न्याय्य एवेत्यनेनैकवाक्यत्वव्यापारनिरासो न कल्पते इत्यभिधानपूर्वकं श्लोकं व्याचष्टे। यत्रेति। इ

बध्यति। नन्विति। तायद्येवमिति भाष्ये णा श्रुतिलिंगयोर्वाक्यत्वोन्नया वाक्यादविवेकं शंकित्वा श्रुतिलिंगवाक्यानि विवक्ष्याख्यानीति
अनेन द्वितीयासामर्थ्याज्ज्ञार्हपत्य प्राधान्यप्रतीतेः श्रुतेर्लिंगत्वेन लिंगादविवेकः मंत्रेर्वेंद्राभिधानादिंद्र प्राधान्यप्रतीतेर्लि
गस्य श्रुतित्वेन श्रुतेरविवेकवाक्ये च यैंद एवाग्नेरुजायतेत्यादिभिरुपक्रमस्थैः पदैर्वेदाभिधानादुच्चैर्ऋचेत्यादीनां चोपसंहा
रस्थानां क्रगादिशब्दानां वेदाभिधानसामर्थ्यादुच्चैस्त्वादीनां वेदधर्मत्वप्रतीतेर्वाक्यस्य श्रुतिलिंगाभ्यां अविवेक इति शंका
त्रयस्यूचनाच्छंकाचतुष्टयमप्येकदा चनस्मरीरसीत्यनेन मंत्रेणोत्यादिना भाष्येण लिंगस्य श्रुतिवाक्याभ्यां विवेकाभिधानात् तृ
तीयाकांशं लिंगांशे वाद्यां परिहृत्य नत्वेवमित्यादिना च श्रुतेर्लिंगात् विवेकाभिधानात् द्वितीयां परिहृत्य वाक्यस्य श्रुतिलिं
गाभ्याम विवेक इत्यंतिमायामंदत्वान्नदेतत्सर्वं स्पष्टेवसमवेतेवि विक्तं च दृश्यत इति प्रतिज्ञामात्रेण निरास सिद्धस्तत्परिहारका
लेपि श्रुतिलिंगयोर्वाक्यादविवेक इत्याद्यां शंकां लिंगांशेनापि शब्दांतरस्य समीपउच्चरितस्य सामर्थ्यमस्तीत्यनेन परिहृ
तत्वाडुपेक्ष्येव तर्हीत्यनेन श्रुत्यंशे तु भाष्ये तत्वेवमित्यनेन श्रुतेर्वाक्यादविवेकेपि स्फुतेरेव लिंगाविरोधेन वाक्यस्येत्यवि

वेकाभ्युपगमेन परिहारे दत्ते लिंगस्यापि तर्हि वाक्यादविवेकाभ्युपगमापत्तेः उक्तस्य मंत्रस्य श्रुत्या गार्हपत्ये विनियोगा
त् उक्तस्य मंत्रस्यैंद्रे विनियोजकेन वाक्येनैव श्रुतेर्विरोधप्रतीतेः पदमात्रविनियोजकेन लिंगेन विरोधाभावात् श्रुतिवाक्य
योस्संप्रधारणापत्तेर्न श्रुतिलिंगविरोधोदाहरणतायुक्तेति लिंगांशे वाक्यत्वशंकायानापि शब्दांतरस्येत्यनेन परिहृता
या अपि श्रुतिदृष्टांतेन पुनरुक्तीवनमाशंक्याथवेत्यनेनोभयोर्वाक्याद्विवेकाभिधानात् परिहारः संभवतीत्याशयः। एत
द्वाथवेत्यस्यैव शंकापरिहारार्थत्वाद्दोनिवेशोयुक्तस्तुपकर्षवाद्याशयमाश्याद्योक्तं द्वाथवेत्यनेनोभयोर्वाक्यत्वेनि
रस्ते श्रुतेर्वाक्यत्वशंकानुत्थानात् एवं तर्हीत्यत्र वाक्यशब्दो न युक्तत्याह अपि वेति। अपकर्षवाद्युक्तं अपकर्षकारणं हे
धातिरस्यति। अत इति। यो देवताविशेषं वक्तुं शक्नोतीति इंद्रशब्दः सोस्यास्ति विद्यते कर्मसमवेतत्वाच्चेंद्रशब्दोक्त्यादेवत
याप्रयोजनमस्तीति एवं शाक्यालोचनयानेन मंत्रेणेंद्र उपस्थातव्य इत्येवं गम्यते नत्विंद्रशब्दश्रवणमात्रादुद्गातरसामर्थ्या
द्वेत्यतो कथमिंद्रशब्दशक्तिमात्रात् उक्तस्य मंत्रस्यैंद्रांगत्वावगतिरित्याशंक्येनकारेणेंद्राभिधायकः शब्दोस्मिन्मंत्रे

युज्यते तदेकवाक्यत्वेनावशिष्टानि पदानि प्रयुज्यन्ते तेन कारणेन कृत्स्नस्य मंत्रस्यैकांगतावगम्यते इति शंक्यैकवाक्यत्वात्स्यां
मंत्रस्यैकांगतावगमाभिधानाद्वाक्यसंकीर्णमेव लिंगं श्रुतिलिंगविरोधाभिधायिनोभिमतं इति मन्यमानेनाक्षेप्त्रा यद्यप्ये
वंविधलिंगं नवाभिमतं तथापि लिंगवाक्यविरोधापन्नः श्रुतिविरोधोदाहरणतानयुक्तेत्यभ्युपेत्यवादमात्रेण लिंगत्व
स्योक्तत्वात् आक्षेप्तु वाक्यत्वाभिप्रायस्य नापि शब्दांतरस्य समीपे उच्चरितस्य सामर्थ्यमस्तीत्यनेन केवलस्य वाक्यस्यावि
नियोजकत्वं निरस्यताऽपनीतस्यापि लिंगसहितं वाक्यं विनियोजकं न विरुध्यतीति शेषमपनेतुमथवेत्यनेनान्यत्त्ववा
क्यत्वनिरासो युज्यते यद्वा श्रुतेरेव केवलाया वाक्यात् विवेकार्येऽंगीवाक्यस्यैवैकवाक्यत्वस्य विनियोगप्रत्यकारणत्वं
विवक्षितं न मंत्रस्य दृष्टांतार्थं तु मंत्रस्यास्यैकवाक्यत्वविवक्षाकारणत्वं पूर्वोक्तमेव प्रसंगात्स्मारितमित्येवं यद्यप्यन्या
समेव वक्ष्यति ते ग्रंथसंदर्भे व्याख्यानं कार्यमिति भावे कृत्वोत्पन्नेरर्थः। स्वमतेन यथान्यासमेव व्याख्यानुमेवं तर्हीति भाष्य राम
स्य वाक्यं स्यैतदित्यवयवं ऐंद्र्याः कंविदुपस्थानार्हपदार्थं प्रति तृतीययांगत्वप्रतीतेर्गार्हपत्यस्य चकश्चिन्मंत्रं प्रतिहति ५१

गृह्यं। गित्वप्रतीतेर्वाक्यत्वे सत्यपि श्रुतेरपि विनियोजकत्वसंभवेन श्रुतिलिंगविरोधसंभवाद् युक्तमात्रांक्षेपोपपाद
यति। तन्नेति। श्रुतेर्वाक्यात् विवेकाभावेपि श्रुतेरेवात्र लिंगविरोधो न वाक्यस्येत्याशंकापरिहारार्थं नैतदिति भाष्यमं
ग्नरुणादिवाक्ये श्रुत्या क्रियामात्रे वाक्येन क्रियाविशेषे प्रकरणेन प्राकरणिके विनियोग इत्येवंवादिमतेथवेसस्य
वाक्यव्यापारनिरासार्थत्वायोगात् तन्नाप्युभयेपि क्ततिविरोधमात्रोक्तेः पौनरुक्त्यमाशंक्य प्रातिपदिकश्रुतिविरोधान्य
र्थत्वेन व्याचष्टे। नैतदिति। गार्हपत्यशब्दस्य यौगिकत्वात् गौणत्वाद्वेंद्रार्थत्वाभावेपि द्वितीयायाः सन्नमप्यर्थद्वागार्हपत्यु
समीपे तिष्ठन्निंद्रमुपतिष्ठेतैंद्र्येत्यविरोधो भविष्यतीत्याशंक्य विभक्तिश्रुत्यनुगृहीतायाः प्रातिपदिकश्रुतेर्विरोधोन्यथ
मग्निसमीपं वेति भाष्यावयवं व्याचष्टे अग्नीसमीपं वा लक्षयेदित्युक्तं समुदायप्रसिद्धपरित्यागो न्याय्यो यौगिकत्वस्यापि
धेयापरित्यागोन्याय्यो गौणत्वसामीप्यलक्षणयोर्निरासः। अन्यथैवेति भाष्यं प्रातिपदिकश्रुत्यनुगृहीतविभक्तिविरोधोन्यथा
त्वेन व्याचष्टे। अन्यथैवेति। श्रुतिविरोधयोः प्रातिपदिकविभक्तिभेदपौनरुक्त्येपि लिंगविरोधस्यनापिशब्दांतरस्य समीपेन्द्र

का ५२ रितस्येत्यनेनमंत्रेवाक्यस्याविनियोजकत्वनिरासेनोक्तत्वात्श्रुतिवद्बलिंगवैलक्षण्यानुपलंभान्नैकवाक्यत्वादिद्व आधा
न्यांकिंत्विद्रशाब्दवत्वान्मंत्रस्येति लिंगस्यैवश्रुत्याविरोधेन वाक्यस्येति लिंगविरोधोक्तेः कथमपौनरुक्त्यमित्याशंक्यना
पीत्यनेन [redacted] केवलस्यवाक्यस्यविनियोजकत्वेनिरस्तेपीदृशस्यलिंगेनावशिष्टानांस्वपदानांवाक्ये
नविनियोगाल्लिंगसहितस्यवाक्यस्यकृत्स्नमंत्रविनियोजकत्वावगतेः पदमात्रविनियोजकत्वेनचलिंगस्यकृत्स्नमंत्रवि
नियोजिकयाश्रुत्याविरोधाभावात्वाक्यस्यैवश्रुत्याविरोध इत्येवंवाक्यत्वविषयदीर्घद्वेषशेषापनयार्थंकेवलस्यप
दस्यसंपूर्णव्यवहारानंगत्वेनाप्रयोज्यतयाविनियोगानर्हत्वात् इड्विशेषणोक्तिद्वाराचावशिष्टानामपिपदानांइ
द्रुक्तिशक्त्युपपत्तेः श्रुतिवाक्याभ्यांसामान्यविशेषविनियोगवत्पदमात्रकृत्स्नमंत्रविनियोगयोरन्योन्योपकारित्वा
भावेनविरोधाल्लिंगविरोधिनावाक्येनतस्यानादिमंत्रवत्कृत्स्नमंत्रविनियोगायोगात् लिंगविनियोगापेक्षितस्यपदां राम
तराणामिंद्रविशेषणोक्तिसामर्थ्यस्यसंपादनमात्रेवाक्यस्यव्यापारेणविनियोग इत्येवंएकवाक्यत्वस्यविनियोगव्याप्या ५२

रनिरासमात्रार्थं निरुक्तवाक्यत्वादिं दूषप्राधान्यमित्युक्तमित्येवं परिहरति। लिंगेति। श्रुतिवाक्ययोर्द्वयोरपि तत्र विनियोजके
ताभ्युपगमे श्रुत्यनपेक्षस्य वाक्यस्य लिंगाविरोधाद्वाक्यानपेक्षायाः श्रुतेरपि यदैन्द्र्यास्तृतीयाश्रुत्येत्यादिवार्त्तिको श्रुत्या
ये नाविरोधात् श्रुतेरेव विरोधो न वाक्यस्येति परिहारो न युक्त इत्याशंकिताक्षिपति। कथं पुनरिति। आक्षेपनिरासाश
क्येरेतत्परिहारार्थत्वेन भाष्यव्याख्यानापरितोषात्स्वमतेनाथवेति भाष्यस्य मंत्रवद्ब्राह्मणेपि एकवाक्यत्वस्य विनियोगव्या
पारनिरासार्थत्वेन व्याख्यासूचनार्थं विरोधे शीघ्रप्रवृत्तया श्रुत्या लिंगादिकल्प्यश्रुतिप्रतिबंधवद्विरोधेपि प्रक्रियासामा
न्यस्याविधेयत्वेन साक्षात्परंपरया वा पुरुषार्थाननुबंधितया शेषित्वानर्हत्वाद्धात्वर्थानवच्छिन्नभावनाश्रयत्वे वा साम
न्योक्तेः संस्थाधिकरणभाष्ये धात्वर्थानवच्छिन्नाया भावनाया धर्मान्वयस्य निराकरिष्यमाणत्वेन दोषतादवस्थ्यात्सामान्ये
न विनियोगायोगेन क्रियाविशेषांगविनियोगं विना तृतीयाश्रुत्यपर्यवसानाया धर्मान्वयस्य निरस्तत्वाद्विधेयस्य स्वविषयस्य सा
सान्यतः समीहितांगत्वेनागते समीहितविशेषसमर्पणद्वारा द्वितीयायाः प्रकृतार्थांगविनियोजकत्वादाख्यातोक्तविधिवि

का॰ हितस्यैवांगस्य द्वितीयाविनियोगोऽनुपपत्त्यावगतेरंगमात्रविनियोगे पर्यवसानायोगादक्षरश्रवणाद्धि तत एवायं गार्हपत्यांगत्वप्र
५३ त्यय इति वार्त्तिकाद्यविशेषविनियोग एव श्रुतिपर्यवसानावगतेरैंद्र्याः गार्हपत्योपस्थानबोधकस्यैव विनियोगे शीघ्रप्रवृत्तत्वया
श्रुत्या वाक्यकल्पश्रुतिप्रतिबंधाद्विनियोगे वाक्यव्यापारानुपपत्तेर्न वाक्यप्रवृत्तिर्निरस्ता मुख्यपां लिंगविरोधाद् इत्येवं परि
हरति॥ उक्तमिति॥ ॥कल्प्यश्रुतिप्रतिबंधसूचनार्था दृष्टांतोक्तिः सैव प्रवर्त्तत इति एवकारेण वाक्यप्रवृत्तिर्निरस्तामु
पपादयितुं श्रुतिकल्पनप्रतिबंधोक्त्यैव पूर्वप्रवृत्तश्रुतिः श्रुतेः शीघ्रं प्रवृत्तत्वावपि सामान्यविषयत्वाद विरोधं वाक्यप्रवृत्ते
स्थानिरासाद्वाक्यविरोधमाशंक्य श्रुतेर्लिंगविरोधं वाक्यस्य चाविरोधं वक्तुं विशेषविषयत्वं सूचयितुमाहायद्वेति। वि
शेषविषयत्वं विना प्रतियोगित्वाद्योगात् प्रतियोगफल्याश्रुतेर्विशेषविषयत्वं सूचितं। परिहाराशयाज्ञानाच्छंकते। ननु
चेतिनान्तृतीयया गार्हपत्यमेव प्रत्येक्याः शेषत्वोक्तेः द्वितीयया चैंद्रीमेव प्रति गार्हपत्यस्य शेषित्वोक्तेः श्रुत्यैव विशेषवि राम
नियोगे कृते वाक्यस्य विनियोजकत्वायोगात् विशेषविनियोगप्रवृत्तश्रुत्यपेक्षितविशेषणविशेष्यान्वयमात्रार्थत्वा ५३

वृत्तेः श्रुतेरेव लिंगविरोधो न वाक्यस्येति स्वाभिमतपरिहारान्तरं। यद्विवरणोक्तां शंकां निरस्यति कथमिति। एकः श्रुति
श्रुतेरन्यो वाक्यश्रुत इत्येवं प्रत्येकं व्यवस्थितत्वेन गांगप्रवर्ग्ययस्य वाक्यश्रुतत्वाभावाद्वाक्यस्य लिंगविरोधाभावेपि श्रुतिश्रु
तस्य सामान्यतो गांगप्रवर्ग्ययस्य कथं विरोध इत्याशंक्य विशेषत एवं गांगप्रवर्ग्ययः श्रुत्याक्रियत इति सूचयितुं तवेत्युक्तं
। निष्प्रतिहृद्युक्त्या वाक्यस्य गांगप्रवर्ग्ये व्यापाराभावः स्पष्टीकृतः। श्रीगान्धर्वागायेत्यत्र समवाये हि सत्यपीत्यादेस्तु परम
तच्छित्वाक्यत्वादिह वारुणपस्य क्रियासंबंधः श्रुत्येतादेशेन तद्वथानुसारेणैव व्याख्यातत्वान्न पूर्वापरवाक्यान्विकविरोधः। भाष्ये
क्तं द्वितीयाश्रुतेर्लिंगविरोधमुपपाद्य विध्यानर्थक्यपरिहारायैवं द्व्यतिरिक्तांगत्वस्येष्याः कल्प्यत्वेनाख्यातान्वयाधी
नत्वात्तद्वाक्यानपेक्षायास्तृतीयाश्रुतेरपि लिंगविरोधायोगात्तस्वानभिमतमपि तृतीयाश्रुतेर्लिंगविरोधं प्रौढिप्रदर्श
नायाह यद्वेति। श्रुतिलिंगविरोधोपसंहारार्थं तस्मादिति भाष्यमाचष्टे। तस्मादिति॥ ॥श्रुतिलिंगविरोधोपपादन
स्य स्तोत्रसमवायोपपादनार्थत्वं सूचयितुं श्रुतिलिंगविरोधोपपादनांतं भाष्यं व्याख्याय भाष्यशेषं व्याख्यानांतं प्राज्ञ

का॰टि स्वं व्याख्यातुं पूर्वपक्षं तावदाह किंतावदिति। श्रुत्याद्यनुमानद्वारा लिंगादीनां प्रामाण्यात् प्रत्यक्षश्रुतिविरोधे च लिंगादिभिः श्रुत्या स्व
देः प्रत्यक्षश्रुतिविरुद्धया स्मृत्यैव श्रुतेः कल्पयितुमशक्यत्वात् कथं तुल्यबलत्वेत्याशयेन पक्षपूर्वमुपपादयति। ऊत इति।
स्वशंक्येत्यनेन स्वतः प्रामाण्यापास्मृतिवैषम्यमुक्तं। स्वतः प्रमाणस्यापि क्वचिद्बाधादप्रामाण्यं प्रत्यक्षादिवद्भविष्यतीत्याशं
क्याह। सर्वत्रेति। प्रत्यक्षादावपि किंचित्प्रमाणमेव कश्चिदप्रमाणाभासएवेति नियतैकरूपप्रकारद्वयातिरिक्तद्वैरूप्य
लक्षणप्रकारांतराभावात् प्रमाणस्याभासता आभासस्य वा प्रमाणता नास्तीत्युक्ते स्वतोन्यथात्वाभावेपि स्वबाधात्प्रमाणस्याप्र
प्रामाण्यं भविष्यतीत्याशंक्याबाधलक्षणत्वात्प्रामाण्यस्य न कदाचित्प्रमाणस्य बाधो बाध्यस्य वा प्रमाणतेत्याह। अपि तर्हि
प्रमाणाभासा एव बाधिष्यंते इत्याशंक्य प्रत्यक्षस्येंद्रियसंनिकृष्टार्थविषयत्वात् इंद्रियासन्निकृष्टार्थविषयसंचारेनुमान
स्याव्यापकविषयत्वादव्यापकविषयसंचारे प्रमाणाभासतेति एवं सर्वेषां विषयांतरसंचारहेतुत्वात् प्रमाणाभासत्वस्य राम
श्रुत्यादीनां चाभिधेयाच्छक्यादन्यतादिति कर्तव्यताकांक्षसमीप्याम्नाताऽसमानदेशात्ममाख्याताऽतस्वविषयाद्विषयांतर ५४

संचाराभावेन प्रमाणाभासत्वं नाशंकनीयमित्युक्तं । तथा चानुत्पन्नविनाशसंस्कारोच्छेदफलापहाराणां बाधप्रकाराणां बाधमध्ये क्वचि
दत्र संभवतीत्याह नैवेति । बाध्यत्वाभिमते विज्ञाने स्मृत्याख्यकार्यदर्शनेनानुद्बोधोपपादनार्थं स्मृतिहेतुतोक्ता । तुल्यबलत्व
पूर्वपक्षं सप्रयोजनमुपसंहरति ॥ तस्मादिति । बलाबलवैपरीत्येन पूर्वपक्षांतरमाह बाधश्चेति । श्रुत्यादिक[illegible]नाहारापि ल्प
लिंगादीनां प्रामाण्येऽविरोधेऽपि स्मृतिवदर्थापत्यादिवदनुष्ठ्यानन्यतरस्मलत्वायोगेन श्रुत्यादिकल्पनस्य दुर्वारत्वात्कल्पनापेक्ष
त्वेन श्रुत्यादिभ्यः पश्चात्प्रवृत्तेः कल्प्यश्रुत्याद्यपेक्षत्वेपि च विरोधिश्रुत्याद्यनपेक्षत्वात् पौर्वापर्यबलीयस्त्वन्यायेन वैपरी
त्यमेव युक्तमित्येवं श्लोकं व्याचष्टे । श्रुत्यादीनां हीति । परदौर्बल्यहेतुत्वेन सिद्धांतोक्तस्य विप्रकर्षस्य पूर्वदौर्बल्यापादकत्वाद्वि
परीतसाधनतामुक्त्वा विप्रकर्षवैपरीत्यादपि बलाबलवैपरीत्यमित्याह । किंचेति । यद्यपि श्रुत्या विनियोगः प्रतीयते तथाप्य
शक्तस्य तत्रावकल्पत इत्यपि शङ्क्यार्थः ॥ सामर्थ्यैकवाक्यत्वाकांक्षारूपाणां तु लिंगवाक्यप्रकरणानामेकवाक्यत्वाकांक्षासंनिधि
स्वरूप॰प्रभ: रूपैः वाक्यप्रकरणस्थानैर्विनानुपपत्तिमिव नाशनीयार्थः । श्रुतेः शक्त्यपेक्षत्वेपि विनियोगानुसारिशक्तिकल्पनया विनियोगोपकल्प

का तद्दृत्याशंक्याह उत्पन्नीति।प्रागविद्यमानसामर्थस्य विनियोगायोगाद्विनियो लिंगावस्थायामश्रुत्याविरोधाभावात्सामर्थ्यस्य
५५ वविनियोजकत्वावगतेर्बलीयस्त्वादाम्नानकालावगतस्यैंद्रविषयस्य सामर्थ्यस्य श्रौतविनियोगकाले निवृत्तेर्नाशंक्य गार्हप
त्यशक्तिकल्पनायोगाच्छ्रुत्यनुसारेणैंद्र एव विनियोगो युक्त इत्यर्थः।।लिंगस्य वाक्यापेक्षितामुपपादयति।एवमिति।केवल
स्यपदस्याप्रयोज्यत्वेनाविनियोज्यत्वात् लिंगेन कृत्स्नमंत्रविनियोगायैकमंत्रवाक्यस्थस्यासमवेतार्थस्यापि देवस्यत्वेत्यादेः प
दसंस्थस्य समवेतार्थनिर्वपामीत्यादिपदेन समुद्देकवाक्यतालक्षणसंबंधबलेन निर्वापादिविषयशक्तिकल्पनेन विनि वि
योगादर्शनात् लिंगस्य वाक्यापेक्षावगतेर्यस्य मंत्रांतरस्थपदस्याटेन मंत्रांतरस्थेन पदेन सहैकवाक्यतालक्षणः संबंधो न वि
द्यते तस्यैव विनियोज्यपदार्थाविषयाशक्तिर्न कल्प्यते तस्मिन् सीदेत्यादेः सदनं करोमीत्यनेन सहैकवाक्यतालक्षणसंबं
धे सति तदन्यथानुपपन्नैव सदनकरणविषयशक्तिसिद्धेः स्योनं ते इत्यादेस्तु सीदेत्यनेन सहैकवाक्यतालक्षणसंबंधान्य राम
थानुपपन्यासादनविषयशक्तिसिद्धेर्वाक्यस्यैव लिंगाद्बलीयस्त्वमित्यर्थः।।वाक्यस्य प्रकरणापेक्षामुपपादयति।तथेति।प्रकर ५५

णस्य क्रमापेक्षितामुपपादयति। तथा सर्वाकांक्ष इति। आकांक्षायाः संबंधसिद्ध्यर्थत्वादसंभवत्संबंधे वैफल्यापत्तेर्नैराकांक्षा
युक्तेति सूचनार्थं संबद्धुं चेत्पक्षं। समाख्यायाः कथं बलीयस्त्वेत्यापेक्षायामाह। समाख्या पुनरिति। वैपरीत्यपक्रममुपसंहरति।
तस्मादिति। समुच्चयेन पूर्वपक्षमाह। अथवेति। सत्वेणासिद्धांतमाह इतीति। पश्च पूर्वलिंगादेर्विनियोगाख्यस्यार्थस्य विप्र
कर्षहेतुमाह। ज्ञात इति। पूर्वार्द्धं व्याचष्टे। यदि हीति। पठितश्रुतिग्रहणो प्रत्यक्षं समुपायोपठितश्रुतिग्रहणो लिंगादीत्या
शयः। पाठ। व्याख्यानोपपादनार्थं पूर्वपक्षाशयमुपन्यासपूर्वं दूषयितुमाह। कथं पुनरिति। चोदनाशब्दो द्विधा त्रैव श्रुतिः प्रमा
णेन विनियोक्त्रीत्याशंक्य शाब्दमात्रमेव धर्मप्रमिति शक्तिप्रदर्शनार्थं चोदनाशब्दे न विवक्षितमिति सूचनार्थं च तथा चेत्पक्षं।
एवं सति षट्प्रकारत्वं भवतीत्याह। तत्रेति। उत्तरार्द्धं व्याख्यातुमाह। ततश्चेति। प्रस्थितयोः प्रदृष्टयोर्मध्य इत्यर्थः। विरोधे पि श्रुति
कल्पनस्य दुर्वीरत्वात् श्रुतिकल्पनापेक्षत्वनिबंधनविप्रकर्षस्य बलाबलवैपरीत्यापादकत्वं बाधकं यदि कल्प्येतेति द्वितीय
पूर्वपक्षवार्त्तिकोक्तं निराकर्तुमाह। तस्मिंश्चेति। आकांक्षारूपप्रकरणावगतसामान्याद्वयापेक्षत्वेनाकांक्षासहितस्य लिंगस्य -

का विनियोजकश्रुतिकल्पकत्वान्नैराकांक्ष्ये सति सामग्रीवैकल्याच्छ्रुतिकल्पनानुपपत्तेः श्रुतिं च विना विनियोगासिद्धेर्लिंगमात्मप्रा
द्वैपरीत्यं दूरोत्सारितमित्याशयः। न केवलं प्रकरणाम्नानान्यथानुपपत्तेः परिहृतत्वात् श्रुतिकल्पनायोगः किं तु विध्याकांक्षा-
सहितानामेव श्रुत्यादीनां विनियोजकत्वात् अत्र च क्रियाचविनियुक्ते मंत्रे विध्याकांक्षानिवृत्तेर्विध्याकांक्षाविरहादपीति
स्वर्वयितुं संनिकृष्टेन लक्ष्येत विप्रकृष्टोपि वैदिकः स एवावैदिकप्रकृत्यात्प्राप्तः सन्निहितो यदैतत्प्रत्तुषंगाधिकरणवार्त्ति
कोक्रमाकांक्षां विना कल्पितस्यावैदिकत्वं स्मारयति। वर्णितं चेति। विप्रकर्षस्य विपर्ययसाधनत्वनिरासमुपसंहरति॥
तस्मादिति। इहश्लोकेनैतदेव द्रढयति। आहेवेति। इममेवश्लोकं व्याचष्टे। श्रुत्यादीनां हीति। पौर्वापर्ये पूर्वदौर्बल्यमितिन्या
यस्यान्योन्यानपेक्षबुद्धिजन्मविषयत्वात् सापेक्षे लिंगादावप्राप्तिसूचनार्थं नहीत्युक्तं। विप्रकर्षविपरीत्यं श्रुत्यापिनासम
र्थस्येति वार्त्तिकोक्तं दूषयितुमनुभाषते। नन्विति। दूषणं प्रतिजानाति। सत्यमिति। प्रश्नपूर्वमुपपादयति। कुतइति। वार्त्तिक
ल्पनं विनानुपपत्त्यपरिहारेप्यंगत्वरूपविनियोगविज्ञानोत्पादनेन श्रुतेः शब्दापेक्षेति पूर्वोक्तेनोक्तज्ञातस्याप्यंगत्वविज्ञानस्य

राम
५६

शक्तिं विना कथं प्रमितित्वनिर्वाह इत्याशंकानिरासार्थमुत्तरार्द्धं व्याचष्टे। विनियोगेति। स्वाभाविकशक्तिनिबन्धनाशक्यं तरस्या
नेकत्र दर्शनान्नैषानुपपत्तिरिति परिहारं सूचयितुमाह। नन्वेति। स्वाभाविकशक्तिनिबन्धनयोगवादी स्वाशयं प्रकटयति। ननुवे
ति। अनुमेयस्य लिंगस्य दुर्बलतरत्वोक्त्यानुमापिकायाः श्रुतेर्दुर्बलत्वं सूचितं। विनियोगात् प्राक् सामर्थ्ये कल्प्यमाने न तत्क
ल्पिकायाः श्रुतेस्तदानीमविनियोजकत्वात् श्रुतिविरोधाभावेन प्रत्यक्षस्य सामर्थ्यस्य विनियोजकत्वापत्तेः कल्प्यस्य सामर्थ्य
स्य प्रत्यक्षाद् दुर्बलतरतापद्येत न तु विनियोगात् प्राक् तत्कल्पनाम्नीत्याह। सत्यमिति। एवं विप्रकर्षवैपरीत्यनिरासेन बला
बलवैपरीत्ये निरस्ते मंत्रप्रकरणान्नो श्रुतेराकांक्ष्याकांक्ष्याप्रयत्नविनियोगनिरासात्तत्समुच्चयपूर्वपक्षस्यापि निरासः सूचिते
विनियोजकश्रुत्यपेक्षितस्य शक्तिकल्पनस्य पश्चाद्भावं सिद्धांतकृत्क्रमाश्रित्य विप्रकर्षेतुल्यत्वात्तु नः कल्प्यबलतां शंकते। न
न्विति। श्लोकं व्याचष्टे। सर्वथाहीति। एवं विधं विप्रकर्षसाम्यं बलाबलसाम्यं नापाद्यतीति परिहरति। सत्यमिति। प्रत्यक्षपूर्वब
लाबलसाम्यानापादकतामुपपादयति। कृत इति। लिंगाद्विनियोगाभिधानात् पूर्वं श्रुत्यनुमानात् विनियोगाभिधानस्य दूरत्वं

का

श्रुतेस्तु विनियोगो नरकालं शक्त्यनुमानान्न विनियोगो क्षे ई रतेत्यर्थः॥ श्लोकं व्याचष्टे लिंगेहीति। श्रुतौ विनियोगप्रत्ययस्योत्प
त्तिविक्षेपाभावेपि प्रमितित्वनिर्वाहाय विक्षेपस्य लिंगिकेन विनियोगप्रमिति विक्षेपणासामर्थ्यात्तुल्यबलत्वेनयुक्तेत्याशंक्या
ह। मन्नेति। प्रस्थानप्राप्यत्वेन विनियोगास्पदेशत्वोपचारात्सह विनियोगाख्यं देशं प्रस्थितयोः सतोः प्रमाणयोर्येन विक्षेपे
णाक्रान्त्वा प्रमाणस्य विरेणा विनियोगप्राप्तिर्भवति तस्यैव दौर्बल्यकारत्वाद्धि नियोगप्रत्ययोत्पत्त्यनंतरकालं तस्य प्रमितिप्र
योजककनिर्देशकारणाजन्यत्वावगमेन प्रमितित्वावश्यंभावावगमात् प्रमितित्वनिर्वाहाय प्रवादकाशंक्तिनिरासार्थं श
क्त्यनुमानविक्षेपेपि विनियोगेन विपरीतो नापि तुल्यो विप्रकर्ष इत्यर्थः तस्मान्नासौ विप्रकर्षो बलाबलं प्रत्यपयुज्यत इ
ति हि शाङ्काव्याख्याया अप्रहार्या। मुगलांतरेष्वेतमेव न्यायमतिदिशति। एतेनेति। प्रकरणाम्नातस्यदेवस्यत्वेत्यादेः समवेता
र्थस्यापदस्य प्रकरणापंगत्वेज्ञाते कथमुपकरिष्यतीति संदेहे यथाशक्नोतीत्यवधारिते कथं शक्नोतीत्यपेक्षाया निर्वपा राम
मीत्यादिवत्प्रत्यक्षसामर्थ्याभावात्समवेतार्थानिर्वपामीत्यादिपदैकवाक्यतादर्शनेन निर्वापादिविशेषणीभूतस्वार्था ५७

भिधानद्वारा स्वार्थविशिष्टनिर्वापा दिप्रतिपादनसामर्थ्यमनुमायानेन निर्वापादिप्रकाशयेदिति श्रुतिकल्पनद्वारा विनि
योगावगतेः प्रयाजादेश्च प्रकरणाम्नातस्योभयाकांक्षादर्शनात् प्रकरणिना सहैकवाक्यतामनुमाय तदन्यथानुपप
त्त्या प्रकरणापेक्षितोपकारजननसामर्थ्यकल्पनपूर्वं अनेन प्रकरणिनमुपकुर्यादिति श्रुतिमनुमाय विनियोगावगते
ःउपांशुयाजादिसंनिध्याम्नातस्य च दब्धिमंत्रादेरुपांशुयाजादिप्रत्याकांक्षादर्शनाच्छिष्टाद्याकांक्षायाश्चाभ्वतो निराकांदे
प्युपांशुयाजादावाकांक्षोत्पादकत्वेदर्शनेनास्याश्चप्युपांशुयाजादावाकांक्षोत्पादकत्वावगतेः उपांशुयाजावर्दब्धिमंत्रा
द्याकांक्षामनुमाय तदेकवाक्यत्वसामर्थ्यश्रुत्यनुमानपूर्वं विनियोगावगतेश्च परस्य वाक्यादेः पूर्वलिंगाद्यपेक्षयावादिसमा
ख्यातस्य च कर्मणो द्वयर्थ्यादिसंबंधदर्शनात् संनिधिमनुमाय तदाकांक्षैकवाक्यत्वसामर्थ्यश्रुतिकल्पनपूर्वं विनियोगाव
गतेः परस्य वाक्यादेः पूर्वलिंगाद्यनुमाय विनियोक्तृत्वेनोपपद्यते पूर्वस्य तु लिंगादिना वाक्याद्यननुमायैव पूर्वश्रुत्याद्य
नुमानमात्रेणाविनियोगे क्लृप्ते प्रत्यक्षदृष्टस्य सामर्थ्यादेरेकवाक्यत्वाद्यंतरेणाप्रमितत्वनिर्वाहान्न निर्वाहार्थं परस्य वाक्यादेर्नु

कौ॰ तरेणैकवाक्यत्वादिलिंगाद्युपपद्यते इत्येवं नांतरीयकत्वेन सन्नावमात्रं विनियोगहेतुत्वानपेक्षं कल्प्यते इति बलाबलवैपरी
त्यनिरासार्थं नांतरीयकतोक्ता एकवाक्यत्वादिनिर्विनासामर्थ्यादेर्दृष्टमात्रस्याथ प्रमितत्वेन श्रुत्यादिकल्पनद्वारा विनियो
जकत्वायोगमाशंक्याप्रमितस्यापि पृष्टहानाभावादेर्निर्दोषकारणाजनितत्वात्स्वप्रमितिप्रयोजकयुक्तज्ञानविषयत्वमात्रेण
बर्हिर्भावादिकल्पकत्ववत्सामर्थ्यादेरपि प्रमितिप्रयोजकयुक्तज्ञानविषयत्वमात्रेणैकवाक्यत्वादिनिर्विनानुपपद्य
मानत्वादेकवाक्यत्वादिकल्पकत्ववत् श्रुत्यादिभिर्विनानुपपद्यमानत्वाच्छ्रुत्यादिकल्पकत्वस्यापि उपपत्तिसत्त्वान्नायेती
त्यपक्वास्तवलौकिकानामेवं सतिपत्तिःसर्वस्वसंवेद्येत्यर्थः वाक्यादीनामपि श्रुतिकल्पनमात्रेण लिंगावद्विनियोजकत्वेऽपि
पन्नेर्लिंगादिकल्पनानपेक्षत्वाच्छ्रुतितः सर्वेषां दौर्बल्येऽपि अन्योन्यन्तुल्यबलत्वेनैव युक्तत्वाशंकते आहेति। विनियोगमिद्धे
विनियोजिका श्रुतिं कल्पयितुं प्रवृत्तैर्वाक्यादिभिरसमर्थविनियोगायोगेन सामर्थ्यमकल्पयित्वा विनियोजिकायाः श्रुतेः राम
कल्पयितुमशक्यत्वात्प्रकरणादिभिरंगांगस्यांगुपकारसामर्थ्यं कल्पयितुं प्रवृत्तैरंगस्यांगपनेन्चर्यं विना स्वपकारसामर्थ्या ५८

योगेनांगांगिप्रतिपादकशब्दैकवाक्यतां च विनीगांगपदद्वयायोगेनैकवाक्यतामकल्पयित्वा सामर्थ्यस्य कल्पयितुमशक्य
त्वात् क्रमसमाख्याभ्यां वैकवाक्यत्वं कल्पयितुं प्रवृत्ताभ्यामाकांक्षां विनैकवाक्यतायोगेनाकांक्षामकल्पयित्वा एकवाक्यता
याः कल्पयितुमशक्यत्वात् समाख्यया वाकांक्षां कल्पयितुं प्रवृत्तया संनिहितालंबनत्वेन संनिधिमकल्पयित्वा कल्पयितु
मशक्यत्वाल्लिंगादीनां यथाक्रममेकादिभिः श्रुतिसामर्थ्यैकवाक्यत्वाकांक्षासंनिध्याख्यैर्वधिभिर्व्यवधिकारित्वं विनियोगं
प्रति विप्रकर्षे वैषम्यं बलाबलापादकमिति परिहरति। तदिति। लिंगवाक्ययोर्मध्ये तावद्वाक्यस्यार्थविप्रकर्षमुपपादयि
तुं प्रतिजानाति। कृतिमात्रेति। तत्र पूर्वमुपपादयति। कथमिति। असमवेतार्थवाचिनां पदानां समवेतार्थवाचिना पदेनै
कवाक्यत्वात् समवेतार्थाभिधानशक्तिं कल्पयित्वा कृतिः कल्प्यत इत्यर्थः। श्लोकं व्याचष्टे॥ सर्वत्र हीति। देवस्य त्वा सवितुः प्र
सवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामीति मंत्रपदानां देवादिविशिष्टनिर्वापप्रकाशनेन प्रयोगार्हत्वोक्त्या
सकलस्यैव मंत्रस्य प्रयोगार्हत्वाभिधानेनैकदेशस्याप्रयोज्यत्वस्य वचनात् ततः शब्देन च प्रयोगार्हत्वं प्रतिपन्नानां विनियोज्य

का
५८ त्वाभिधानाद्वाक्यसहकृतेन लिंगेन सकलमंत्रविषयकृत्यनुमानं सूचितं। एवं तर्हि स्योनं ते तस्मिन्सीदेत्यनयोरपि तच्छब्द
योगावगतैकवाक्यत्वानुपपत्त्या तस्मिन्सीदेत्यस्यापि सदनकरणे स्योनं ते इत्यस्यापि च पुरोडाशसादने सामर्थ्यकल्पनो
पपत्तेर्लिंगेन बाधो न युज्यते इत्याशंक्याह। तद्वेति। द्वयोः समवेतार्थत्वसंभवे भेदेन विनियोगाय प्रष्ठानादिरोधावगतेर्युक्तो
बाध इत्याशयः। प्रस्थित इति भावोत्पन्नया निष्ठया प्रस्थानमुक्तं। लिंगेनैकत्र प्राप्तवतो वाक्येनान्यत्र नेतुमशक्यत्वां लिंगाद्व
प्राप्नुवतः स्वप्रकाश्येऽर्थेन्येष्वेवा वाक्याद गच्छेद्योवकाशादातं ता प्रश्न पूर्वमुपपादयितुं वाक्याल्लिंगस्यार्थसन्निकर्षमाह
कथमिति। केवलस्य पदस्य प्रयोक्तृत्वात् तद्वाक्यसहकृतेन लिंगेन सकलस्यैव मंत्रस्य विनियोगावगतेः तच्छब्दप्रयोगेणा
चस्योनादेः सुमनस्यमानांतस्यैकमंत्रत्वावगमादेकैकेनैव सामर्थ्येन तावतः पदसमूहस्य विनियोगसिद्धेः सामर्थ्यांतरकल्प
नानापत्तिरित्याशंकां निरस्यत् श्लोकं व्याचष्टे। समुदायो हीति। कल्प्यग्राम्यं तस्य स्वार्थविशिष्टोपस्तरणप्रकाशनेन नैरा राम
कांक्ष्यात् तत्प्रकाशितस्योपस्तरणसंस्कृतस्य सदनशब्दोक्तस्य स्थानस्य तच्छब्देन ग्रहणात् सादनविशेषणत्वेपि उपस्तरण ५८

विशेषणानांकल्पयाम्यंतानांसादनविशेषणत्वानुपपत्तेः कृत्स्नोपस्तरणविनियोगानपेक्षः कल्पयाम्यंतोवयवःसादनेवि
नियोक्तुमशक्यः तस्मिन्सीदेत्यादेस्तु स्वार्थविशिष्टसादनप्रकाशनेनैराकांक्ष्यात् तत्स्वकाशितस्यसादनस्योपस्तरणक्रिया
विशेषणत्वेपिसादनविशेषणानामुपस्तीर्णास्थानादीनामुपस्तरणक्रियाविशेषणत्वानुपपत्तेःसादनविनियोगानपेक्षम
स्मिन्नित्यादिरवयवोनोपस्तरणे विनियोक्तुंशक्य इत्याशंकानिरासाशयः समुदायविनियोगस्यावयवविनियोगापेक्षत्वा
त्शक्यंतरकल्पनापेक्षत्वेपिएकवाक्यतयैवशक्तिद्वयस्यापिकल्प्यत्वात् विप्रकर्षसाम्यशंकांनिराकर्तुमवयवद्वयस्यैकवा
क्यत्वमात्रमन्योन्यानपेक्षोपस्तरणसादनरूपभिन्नार्थाभिधानशक्त्यवगमात् तथाकुशाश्वालेत्वनयाप्रत्यक्षंवक्ष्वीग्रंप्रतीयतेनउ
पस्तरणविशिष्टसादनरूपस्यसादनविशिष्टोपस्तरणरूपस्यचैकस्यार्थस्याभिधानेशक्तिरन्योन्यानपेक्षार्था। भिधानशक्तिद्वैक्ष
स्नस्वविशेषणाविशिष्टैकैकार्थप्रत्यायनेनप्रागेवसिद्धेत्फलेश्लोकव्याख्यार्थं तत्रसमुदायेत्यादिनालिंगाद्वाक्यस्यविप्रकर्षेक्तिपू
र्वबाधसिद्धेप्रकरणेमंत्राम्नानस्यनैराकांक्ष्यमुक्तंसाधयितुंप्रकाशकयोर्मंत्रयोर्लैंगिकेनविनियोगेननैराकांक्ष्यमुक्त्वाप्राकरणि

का। कपदार्थप्रकाशनाख्योपकारनिर्वृत्याप्रकरणिनोपिनैराकांक्ष्यंप्रकाशययोरर्थयोर्नैराकांक्ष्योक्त्यावक्तुंकल्पयाम्यंतमंत्रावरु
६० द्धत्वात् उपस्तरणस्यतस्मिन्नित्यादिमंत्राग्राहित्वेतस्मिन्नित्यादिमंत्रावरुद्धत्वाद्वसादनस्यकल्पयाम्यंतमंत्राग्राहित्वेभिहिते
सादनस्योपस्तरणंप्रति उपसर्जनत्वेनोपस्तरणस्यसादनविशिष्टतयाप्रकाशपत्वात् कल्पयाम्यंतमंत्रमात्रेणाचतथाप्रकाश
यितुमशक्यत्वात् उत्तरमंत्रग्राहितां उपस्तरणस्यावासादनंप्रत्युपसर्जनत्वेनसादनस्योपस्तरणविशिष्टतयाऽप्रकाशपत्वात्
तस्मिन्नित्यादिमंत्रमात्रेणाचतथाप्रकाशनाशक्तेः पूर्वमंत्रग्राहितामाशंक्यस्यप्राधान्येचेत्यक्तं[illegible]तस्यलिंगवाक्ययोस्तावत्
बलाबलंसिद्धमित्याह। तस्मादिति। लिंगबलेनदृश्यमानेकवाक्यत्वबाधेलिंगविनियोज्यस्यपदस्ययावद्भिःपदैर्विनानै
राकांक्ष्यंनसंभवतितावतांलिंगापेक्षितेनवाक्येनविनियोगोप्यतिरिक्तानामसमवेतार्थवाचित्वात्पृथक्प्रयोगानर्हाणा
मपिलिंगेनबाधादविनियोगापत्तेःशिष्टानित्वसमवेतार्थाभिधायित्वादित्यादिवार्त्तिकेनदेवस्यत्वेत्यादीनांनिर्वापेविनियो राम
गोक्तिर्विरुद्धेत्याशंकते। नत्विति। कृत्यादिसमाख्यापर्यंतप्रमाणाविनियोग्यानांदर्शपूर्णमासांगानांनिन्नोपकारसाधनत्वा ६०

त्समुच्चयवद्देवस्य त्वेत्यादीनामपि वाक्यीय विनियोगान्यथानुपपत्त्या भिन्नप्रयोजनत्वकल्पनया समुच्चयसंभवाद्बाधमा
शंक्य भिन्नप्रयोजनत्वाद्यः समुच्चयः शंक्यते स भिन्नप्रयोजनत्वे सति याज्यानुवाक्यादिवदेकवाक्यत्वाभावापत्तेर्भिन्नप्रयोज
नत्वायोगान्न संभवतीत्युक्तेऽयं दृष्टमनुज्ञाप्रकाशनं चेह प्रयोजनांतरं शंकनीयं तस्य च तदवमे निराकरिष्यमाणत्वेन लिंगविनि
तू प्रयोजनांतरशंकाप्ययुक्तेत्याह निशायाया वश्यं वेत्युक्ता लिंगविनियोजकस्य पदस्य देवस्य त्वेत्यादिपदानपेक्षत्वेऽपि देवस्य
त्वेत्यादीनां लिंगविनियोज्यानि निर्वपामि पदैकवाक्यत्वं विना तदर्थक्यापत्तेर्मन्त्रपरिहाराय वाक्यस्याप्यवश्यग्राह्यत्वान्निर्वापवि
नियोगोक्तिरविरुद्धेत्याशयेन परिहरति अत्रेति अत्रोत्पन्नपादन पूर्वश्लोकं व्याचष्टे निहीति न्यायतिर्वापाद्वयेरय
ये नुष्टमित्यादिभिर्निराकांक्षीकृतोऽपि निर्वापो देवस्य त्वादीनां साकांक्षत्वादुपन्नपुनराकांक्षः स न देवस्य त्वादिपदप्रकाश्य
त्वं प्रतिपद्यत इत्युक्ते निराकांक्षस्याप्यन्याकांक्षयाकांक्षोत्पन्नपादनार्थं प्रकरणप्राप्ते धर्मे निराकांक्षीकृतानामप्युपांशु
याजादीनां निराकांक्षफलवत्सु निखिलकारणान्यामाकांक्षामुत्पाद्यानुमन्त्रणादिधर्मप्राप्तिं प्रयाजादीनां च प्रकृत्यर्थं येन नि

का॰ ६१ राकांक्षीकृतानामपि विशिष्टात्याकांक्षयोत्पन्नाकांक्षाणां विशिष्टति गमनं दृष्टांतखिलात्यंतसाम्यार्थं मंत्रशेषस्यैकमंत्रावयवा
न्वयेन निराकांक्षीकृतस्यापि मंत्रांतरावयवाकांक्षयाकांक्षामुत्पाद्य मंत्रांतरान्वयं दृष्टांतयितुं यथाल्क्षणाच सकृदुच्चारि
तमंत्रशेषस्य युक्तायां विचारितायां सकृदुच्चारितमंत्रशेषविषयत्वात् प्रतियोगित्वेनानुषंगाधिकरणोपसक्ते मंत्रशेषार्थो
यथैकमंत्रावयवान्वितशेषप्रकाशितत्वेन निराकांक्षीकृतोऽपि मंत्रांतरावयवानां साकांक्षत्वात्पुनरुत्पन्नाकांक्षः सन्पुन
रुच्चारितपूर्वमंत्रशेषप्रकाश्यत्वं प्रतिपद्यत इति व्याख्यातमित्येवं यथा तृप्ता विति पाठे यथासोमस्य नकृणां वसुमञ्ज्ञणादिप
दैः प्रकाशनेन निराकांक्षीकृतमपि मंत्रादीनां दृष्टपत्वं तानां पदानाम नन्तुष्टयदृष्टिप्रकाशनेकर्मातं गत्वापन्नेन कृणोपस
न्नेनीभूततृप्तिप्रकाशनार्थत्वेन साकांक्षत्वात् पुनरुत्पन्नाकांक्षं सत्तृप्तमित्यादि प्रकाश्यत्वं प्रतिपद्यत इति व्याख्यातमित्येवं
तृतीयं दृष्टांतमुक्त्वा विप्रकृष्टपाठानामपि देवस्य त्वादीनां निर्वापसंबंधोपपन्ने निर्वापे वियोगोऽन्यविरोधमुपसंहरत्यपु राम
दांतराणि यत्रार्थमिति स्लोकावयवं व्याख्यानुयेषां विलंबु नांदेवस्यत्वेत्यादिपदानां आनर्थक्याय न्नाव पिलिंगेन बाधान्निर्वी ६१

चेविनियोगायोगमाशंक्याहासर्वेषामेवेति। विधिना सामान्यतः समीहितांगतायांज्ञातस्यविशेषमात्रबोधे श्रुत्यादीनां
व्यापारादानर्थक्यापत्तेश्चसमीहितांगत्वायोगात्र श्रुत्यादीनां व्यापारः संभवतीत्याशयः। श्रोष्यतइत्युपेक्षायां नवमाद्यसि
द्धंप्रकरणेन श्रुतिबाधमुदाहरति तद्यथेति। श्रुत्याङ्गरूपेणशेषित्वं प्राप्तं प्रकरणप्राप्तेन प्रकृतापूर्वसाधनीभूतानां व्रीह्या
दीनांसमीहिततयाशेषित्वं नबाधित्वा प्रकरणालभ्यंयदपूर्वसाधनत्वं तत्क्रतः प्रोक्षणादिसंबंधेन नवमाद्ये नविष्यतीत्यर्थः
शेषस्येत्यादीनांनिर्वापांगत्वविरोधापत्तेः लिंगस्यवाक्याद्दुर्बलीयस्त्वायोगाशंकायाः परिहारमुपसंहरति। तेनेति। येनकार
णेनलिंगस्यवाक्याद्दुर्बलीयस्त्वेपिनानिष्टापत्तिस्तेनेत्यर्थः। लिंगाद्बलीयस्त्वानभ्युपगमेएवत्वेकोपक्रमोपसंहारवशेनैकवा
क्यत्वस्यमन्त्रानुवाकेवगतस्यलिंगेनबाधोमन्त्रानुवाकाधिकरणेनविरुध्येतेतिसूचयितुमाह। तद्याचेति। वाक्यात्प्रकरणा
स्यार्थविप्रकर्षप्रतिज्ञापूर्वमुपपादयितुमाह। वाक्येति। अंगांगिवाक्यसंगत्यत्वावेष्ठुत्तयाकांक्षामात्रेणांगांगपन्नयावगमा
दंगस्यागफलकारसामर्थ्यकल्पनपूर्वविनियोजकश्रुतिकल्पनोपपत्तेर्विप्रकर्षायोगमाशंक्यकांक्षकरणत्वबहुत्वंपाकः क्रिया

का· र कःकर्त्ता वर्त्तमानः काल इति शाब्देक्तानामप्यर्थानां शाब्दान्वयोन्नावे न्वयादर्शनात्काष्ठैः पचतीति शाब्दान्वये वसत्यर्थान्वयदर्शना
६२ दंगांगिवाक्यान्वयं विना गांगपन्वयायोगावगतेरंगांकांक्षा तेनांगांगिवाक्यरूपाणां शाब्दानां संगतिरनुमीतव्येत्यर्थः । श्लोकं व्या
चष्टे प्रकरणेऽङ्गीति वाक्यानामित्यनेन प्रकरणेनांगांगिवाक्यानां प्रत्यक्षासंगतिर्नास्तीत्यर्थः स्वचितवाक्यपदानां संगतिः प्रत्य
क्षेत्यर्थः । विप्रकृष्टत्वव्याख्यार्थं तत्र श्रुत्युक्तं यावदितरत्वप्रकरणसामर्थ्येन श्रुतिः कल्प्यत इत्यनुषक्तेन पदेन कल्पनायाव
र्त्तमानत्वोक्तेस्तावदितरत्र वाक्ये श्रुत्या विनियोगो निहित इत्यनेन च विनियोगाभिधानस्य भूतत्वोक्तेः प्राकरणिकश्रुतिकल्प
नानुपपन्नाक्ये विनियोगाभिधानमुक्तं वाक्यात्मकरणस्यार्थविप्रकर्षफलेनोपसंहरति तस्मादिति । प्रकरणात्क्रमस्यार्थवि
प्रकर्षं प्रतिजानाति तत्रयेति । प्रश्नपूर्वमुपपादयति कथमिति । प्रकरणमाकांक्षातः प्रवृत्तिश्रुतेरर्थे विनियोगं प्रतिगच्छति क्र
मस्तु विनियोजकत्वसिद्ध्यर्थं श्रुतिगाकांक्षां विना गोरस्य इत्यादौ सन्निधानेप्यन्वयादर्शनादाकांक्षामपि इतराकांक्षातो ल राम
त्रेकवाक्यत्वसामर्थ्यकल्पनपरंपरया कल्पयितुमारभ्यत इत्यर्थः । तद्विमंत्रस्यानिर्ज्ञातोपायपरिमाणत्वेनानिर्दृष्टाकांक्षतये ६२

पांसुयाजे साकांक्षेऽक्रमेणाविनियोगात्प्रपणमात्क्रमेपि तु न यथाकांक्षायाः प्रत्यक्षत्वादंगाकांक्षायां गपाकांक्षाकल्पनोक्तिर
युक्तेत्याशंक्याह। क्रमो नामेति। मंत्रस्य क्रियात्वेनानितिकर्त्तव्यतारूपत्वेऽपि कर्त्तव्यताकांक्षेणा पांसुयाजेनाभिधानकि
यातपेक्षस्याकांक्षितुमशक्यत्वात् दर्शमंत्रस्य वा विज्ञातलिंगत्वेनाभिधानक्रियाद्वारा या कांक्षितुमशक्यत्वात्तेन पांसुयाज
स्यार्थितो मंत्राकांक्षास्तीत्याशयः। निरपेक्षाणां संतां प्रधानामनुष्ठानदेशतः पाठदेशीतो वांगानां सामान्यमात्रं क्रम इत्यनुष्ठाने
क्यापाठस्यापुपलक्षणादर्थः। रु पांसुयाजस्य दर्शमंत्रानपेक्षत्वं साकांक्षत्वे। निष्पापादनेनोपपादयितुमाह। यदि त्विति। नि
राकांक्षप्रधानसंनिधेः क्रमत्वे साकांक्षसंनिध्याम्नातप्रकरणेन सह क्रमस्यैकविषसमवायायोगात्तत्कथं विक्रमप्रकरणावि
रोधोदाहरणं युक्तमित्याशंक्याह। अत्रचेति। विकृतित्वेन प्राकृतैरंगैर्निराकांक्षीकरणात्क्रमस्य महाप्रकरणे पतिपाताद्वप
करणस्य समवाययाग्यासुसंभवतीत्याशयः। देवस्यापि तर्हि ज्योतिष्टोमिकमहाप्रकरणे पतिपाताद्दर्शपूर्णमासविकृतित्वा
द्वोदाहरणत्वापत्तेः। सु पशुधर्माणां क्रमप्राप्तदेशांगत्वप्रकरणेन बाध्येतेत्याशंक्य संनिपत्योपकारिणां प्रकरणाविनियोज्यत्वाभावा

का॰
६३

दनुदाहरणत्वसूचनार्थं प्रायेणोत्क्तं । राजसूयादिमहाप्रकरणांतर्गताह्यभिषेचनीयाद्यासुत्यातिष्टोमादिविकृतिषु शौ
नःशेपाख्यानादीनां माहेंद्रस्य स्तोत्रं प्रत्यभिषिच्यत इत्यादिना प्राकृतमाहेंद्रस्तोत्राद्यंगसंबंधित्वेन विधानात माहेंद्रस्तोत्रा
द्यंगत्वावगतेर्निरंगस्य च माहेंद्रस्तोत्रादेर्वैगुण्यापादनादिति दिष्टमुपकारं प्रकृतौ शौनःशेपाख्यानाद्यनपेक्ष्यमपि प्रतिविकृतौ त
दुद्दिहितस्यासाधनत्वाद्वमप्रमादेति दिश्यमानानां माहेंद्रस्तोत्रादीनामुपदिश्यमानांगवैशिष्ट्यं विनातिदेशापर्यवसानावग
तेर्विकृतिकथंभावाकांक्षायामनिष्टत्वायामेव शौनःशेपाख्यानाद्युपनिपातादवांतरप्रकरणेन माहेंद्रस्तोत्रादिद्वारानिषे
चनीत्याममहात्र्यंगत्वप्रतीकरणाद्बाधान्महाप्रकरणांतर्गतानामपि विकृतीनां नोदाहरणतायुक्तेति मध्यस्थं यस्य तन्मध्य
इति चतुर्थाधिकरणपूर्वपक्षन्यायेनाशंक्य माहेंद्रस्य स्तोत्रं प्रति अभिषिच्यत इत्यस्याभिषेचनीयांगभूतमाहेंद्रस्तोत्रदेशो
भिषेकांतशौनःशेपाख्यानाद्यनुष्ठानविधानार्थत्वेनानुत्पन्नविधित्वादुत्पन्नविधिवेलायामेव च प्रयोजनापेक्षणादभि
षेचनीयात् बहिष्कृत्य त्रानामहाप्रकरणाद्राजसूयं गत्वावगत्याचक्षितार्थत्वेन माहेंद्रस्तोत्रसंयोगस्यादेशार्थत्वोपपत्तेस्त्र

राम
६३

द्वारान्निषेचनीयांगत्वकल्पनायोगात्क्रमेणैवाभिषेचनीयांगताकल्पनीयेति सर्वासांचासमत्वाच्छादनात् ततः स्यान्न हि प्रक
रणं देशार्थमुच्यते मध्य इति तदीयसिद्धांतन्यायेनोत्कर्षणात्वसमर्थनं सूचयितुमाह। ...सुद्धीति। शौनःशेपाख्यानादीनामभिषेचनीय
प्राकृतांगानुवादेन विधानादभिषेचनीयकथंभावग्राह्यत्वाशंकां निराकर्तुं यत्तु प्राकृतांगानुवादेननोत्पन्नमिति वाच्यं प्राकृतानुया
जो देशविहितं दृष्टं सदा ज्यवहि विधानार्थो नू दित प्राकृतांगद्वयमध्यपातितः प्राकृतांगानमनुवादेनाप्युत्पन्नस्यांगस्य संदंशाभिद्यक्तकथं
भावग्राह्यत्वसूचनार्थं प्राकृतांगमध्यपातित्वेनेत्युक्तं प्राकृतांगगुणविधौ ततः प्राप्तातिदेशापर्यवसानात् कथंभावानिष्टत्वमुक्त
पगमेपि निषिद्धं तं पशुं प्रणयन्तीति प्राकृतांगापकर्षविधानात्प्रागुत्पन्नानार्थं मुपाकरणादीनामपि द्रूपकरणग्राह्यत्वापत्तेः क्र
मविनियोज्यत्वापत्तिर्विरुध्येतेत्याशंक्य ल्होप्प्रकारप्राकृतांगग्रहणे प्रवृत्तस्य कथंभावस्य स्वतोल्ह्लाप्रकारापूर्वांगग्राहित्वायो
गात्प्राकृतांगाद्वयस्य प्रागपूर्वांगग्रहणाहेतोः प्राकृतांगगुणविधित्सु पुरस्तादुपरिष्टाद्वा अवस्थितेष्वंगेषु अभावात्प्रकरणग्राह्यत्वा
नापत्तिसूचनार्थं पुरस्तादित्युक्तं। एवं च क्रमेणोन्याकांक्षया। प्रत्यक्षत्वशंकां क्रमप्रकरणविरोधोदाहरणायोगाशंकां च निरस्य प्र

का॰ करणात्क्रमस्यार्थविप्रकर्षं विघटयोतितातथेति। समाख्यायाः क्रमादर्थविप्रकर्षं दर्शयितुमारभते तथेति। क्रमसमाख्ययोर्मध्ये
६४ क्रमे संबंधायान्योन्याभिमुख्यरूपेण सन्निधानाख्यं परस्परवर्द्धुपश्चात्पर्यवेदर्शितत्वात्प्रत्यक्षमित्यनेनार्थात्समाख्याया
मप्रत्यक्षमिति विप्रकर्षसिद्ध्यर्थमुक्तेपेक्षां विनासंबंधायोगात्समाख्यायाः क्रमसंबंधमात्रेणापेक्षासिद्धेर्विप्रकर्षायोगमाशं
क्यसंशब्दस्यैकीभावार्थत्वात्संबंधशब्दस्य च नियमार्थत्वात्तदवश्यवक्तव्यत्वालोचनया नियम्यते यदेकस्यां संबंधःस्योर्थ
शब्दयोरित्यादिव्यवहारालोचनया च संबंधस्यैकत्रनियमरूपत्वावगतेः संबंधिनोः केन चिच्च भिन्नेन संबंधहेतुना विना सं
बंधायोगादसिद्धात्मलाभेन च संबंधेनाकांक्षायाः कल्पयितुमशक्यत्वादेकत्रसंनिधानाख्यसंबंधिनोः सन्निधानसंबंधहेतु
त्वेनावश्यकल्पनीयं न च पौनरोडाशिकसमाख्यावतः शुंधध्वमिति मंत्रस्य पुरोडाशपात्रशुंधनेन सह किंचित्पाठतो वा
नतो वा देशैक्यं वेदेन विरचितमस्ति येन मंत्रस्य पुरोडाशपात्रशुंधनेन सह तन्निमित्तसंबंधार्थं संबंधिनोरन्योन्याभिमुख्यं राम ६४
स्यादाभिमुख्यानपेक्षं चोपस्थानं तत्वदाप्नेनचिनियोगायाजमानमिति सर्वत्रहीत्यादिनोक्तं। समाख्या पुनः प्रत्यक्षमेव संबंधं वदति

तिपूर्वपक्षवार्त्तिकोक्तं समाख्यायाः श्रुतितुल्यत्वं दूषयितुमनुभाषते नन्वेवेति। दूषयति। नैतदिति। श्रुत्याभिधेयादंगांगित्वविशेष
रूपात्संबंधात्सामाख्यानिकस्य संबंधस्य सामान्यरूपत्वेनान्यता। तया श्रुतितुल्यत्वे निरस्ते प्राप्तिः गम्यार्थकल्पनात्तया अभिधानं निर
स्तं। लौकिक्याः समाख्याया वैदिकसंबंधप्रतिपादने तिविप्रकर्षं सूचयन् पूर्वश्लोकं व्याचष्टे॥ ॥ अर्थानामिति। यापि वैदिकी समाख्यानव
गतसंबंधार्थप्रतिपादने प्रवर्त्तते सापि तावदंगांगित्वं प्रतिपादयतीति वदता तिविप्रकर्षो लौकिक्याः सूचितः। येनकेनचिदित्यनेन सा
मान्यरूपतया अन्यत्वं व्याख्यातं। सर्वत्र हीति। वार्त्तिके नांगांगिसंबंधस्यैव सन्निध्यपेक्षोक्तेति भ्रान्त्या समाख्याकल्पितस्य संबंधमात्रस्य सन्नि
विकल्पनहेतुकविप्रकर्षाभावशंकां निराकर्तुमाह। संबंधमात्रस्यैवेति। यद्युत किंचिदविभिन्नं संबंधिनामस्तीत्यवगतं ते सत्यवगम इत्य
थाहारेणायोग्यासंबंधस्य सन्निध्यपेक्षोक्तेः क्रमसमाख्याबलाबलसिद्ध्यर्थत्वं दर्शयितुमाह। तत्रेति। विप्रकर्षमेव प्रपंचयति
समाख्या हीति। प्रकृतार्थमुपसंहरति। तस्मादिति। एतदेव दृढयितुं वृद्धानां श्लोकपंचकं पठति। आहुश्चेति। अतश्च यत्पूर्वपक्षवा
र्त्तिके विरोधेपि बाधायोगा ग्न्यर्थकविद्धस्य प्रमाणत्वमित्युक्तं तदयुक्तमित्याह। तस्मादिति। यदपि नित्यं प्रमाणाभासस्यैव बाधइ

का· त्युक्तं तदप्यनुभाषमाणः पूर्वं परिहरति। यत्विति। यदपि कृत्वादि षड्कस्य च समस्तस्येत्यादि वार्त्तिकेन विषयांतरसंचारो भावेन लिंगादी
६५ नाञ्चवित् प्रमाणाभासत्वयोगात् तद्बाध्यत्वं तद्युक्तमित्युक्तं तदपि दूषयितुं प्रश्नपूर्वं प्रमाणाभासतामुपपादयति। कथमिति। श्लो
कं ह्याचष्टे। नहीति। श्रौत विनियोगान्यथानुपपत्त्याथ तत्साधनत्व गुणयोगेनेदं तत्पर्थानुसाराद्दैं ऋग्राहस्य गार्हपत्यपरत्वावगते
रिंद्रोपस्थानस्याशक्यत्वेन लिंगाविषयत्वात् स्योनं ते तस्मिन्सीदेत्यनैयोग्य लिंगात् भिन्नवाक्यत्वावगतेरर्थान्यत्वेन वाक्याविष
यत्वात् पौर्णमासीदेवतापदशेषाणां च वाक्यादमावास्यादेवतापदैकवाक्यत्वाभावावगतेरमावास्याप्रयोगेणेति कर्त्तव्यतात्वेना
नाकांक्षणाद् अमावास्यादेवतापदशेषाणां च पौर्णमासीदेवतापदैकवाक्यत्वाभावावगतेः पौर्णमासीप्रयोगेणानाकांक्षणात् प्रकरण
विषयत्वानुपपत्तेः शौनःशेपाख्यानादीनां च प्रकरणात् प्रकृतसर्वयागसाधारण्यावगतेरभिषेचनीयमात्रसन्निध्यभावेन क्रमावि
षयत्वात् शुंधनमंत्रस्य च क्रमात् सान्नाय्यपात्रशुंधनार्थत्वावगतेः पौरोडाशिकसमाख्यायाश्च दर्शपूर्णमासमात्रकांडविषयत्वाव राम
गमेन पुरोडाशमात्रकांडपरसमाख्याया अविषयत्वाल्लिंगादीनां विषयांतरसंचारो विषयापहारो वा बलवत्ता बाधितेविषयेवा ६५

२ पसंहरतीतेनेति। यद्यपि न वस्तुतो ज्ञातं ज्ञानमित्यादि। वार्त्तिके न बाधप्रकारासंभवाद्बाधो न कुत्राप्यस्तीति संभवतीत्युक्तं तदप्युत्पत्तिप्रतिबंधस्य २
पारान्नावसिद्धेः सूचितः। बाधहेतुकत्वाद्व्यापारानावस्य बाधात्प्राग्व्यापारोपक्रमे सत्यपि बाधाद्विषयांतरसंचारावगमोत्तरकाल
मसमाप्तव्यापारत्वात्प्रमाणाभासतेत्यन्यथाप्रमाणाभासतामुपपादयितुमाह। अथवेति। प्रमाणाभासतामेवोद्बाधाभ्युपगमेन
परिहरति। अनुत्पन्नमेव वेति। व्यापारोपक्रमप्रतिबंधसूचनार्थो वकारः। व्यापारोपक्रमपक्षेऽांतरालिकशुक्तिलिंगादिकल्पनरू
पज्ञानमिथ्यात्वकल्पनाया इष्टेर्भूतलक्षणार्थया वृत्तीयया बाधप्रकारतोक्ता। शेषयोरपि ज्ञानं तु पक्षद्वयेप्यनुत्पन्नमेव बाध्यते॥
बलाबलकथनार्थं वेह प्रकारांतरस्यानाशंकनीयतोक्ता नतूपपादनसामर्थ्यादिति सूचयितुं योप्यनुमानादीनां प्रत्यक्षादिभिरुत्पन्न
बाधो बाधयंथैव वक्ष्यते तमपि तत्रैवोपपादयिष्याम इत्याह। योपिवेति। एकैकस्यैव नाप्येबाध्यत्वोक्तेः सूत्रे परशब्दस्यात्रानंतरपर
मात्रविषयत्वभ्रांतिं निराकर्तुं व्यवहितपराणामपि बाध्यत्वस्य प्रपंचनीयतामाह। एवमिति। श्रुतेर्वाक्यविरोधे तावच्चोदाहरणं
बलाबलं प्रपंचयति। यथेति। आनंतर्यसामानाधिकरण्यावगतात वाक्यसामर्थ्यादैंद्राग्न्याद्यंगत्वेनारुणादिप्राप्तवदित्य
र्थः। षष्ठीश्रुतेः प्रकरणविरोधमुदाहरति। श्रुतीति। षष्ठीश्रुतिसंयोगाविशेषेणानुवचनानामेव प्रकरणविरोधेन द्वादशत्वस्य

का॰। तिपरमतं दूषयितुमुपन्यस्यति। अनुवचनानां चेति। एवकारार्थे चकारः दूषयति। नत्विति। स्वविशेषणवैशिष्ट्यं विनावैगुण्यापत्तेरिति क
६६ र्त्रयतात्वायोगेनाहीनेति दिश्यमानानामुपदिश्यमानद्वादशत्ववैशिष्ट्यात् प्राक् अतिदेशापर्यवसानादहीनकथंनावग्राह्यता
नविरुद्धेत्याशयः। विप्रकर्षं दर्शयति। इहापि चेति। ज्योतिष्टोमेपि विध्यंतदानानामयंकल्याविहितत्वाहीयतइति व्युत्पत्त्याऽही
नत्वात्फपपत्तेर्नेदं अतिविरोधोदाहरणां युक्तमित्याशंक्याह। नैवहीति। अतेः प्रश्नपूर्वं क्रमविरोधमुदाहरति अतीति। रशनात
द्धर्मास्तुदर्शमयादयः क्रमादग्नीषोमीययागांगरशनत्वायूपं परिव्ययतीति द्वितीयाक्रत्वा रशनायायूपांगत्वेवगते दर्शवृम
यीरशनानामवतीत्यादौ रशनानां क्रत्वा रशनात्वेकार्थसंमवायि यूपांगत्वं लक्षयित्वा तदुद्देशेन दर्भमयीत्वादिविधानात्तद्
र्मास्त्वास्यांगमित्यर्थः। यूपस्याग्नीषोमीयांगत्वात्तत्समधर्मिकायारशनायायूपांगत्वेपिज्योतिष्टोमांगक्रत्वांगस्यारुण्यपसवेज्योति
ष्टोमांगत्वबदग्नीषोमीयांगत्वोपपत्तेरविरोधमाशंक्यालौकिकत्वेन यूपस्यस्वरूपोत्पत्त्यर्थमेवरशनादिधर्माणामग्नीषोमीयोपपत्तेः क्र राम
यवत् प्रकृतापूर्वसाधनपेक्षाणात् यूपरूपेविधीयमानानांरशनादीनामग्नीषोमीयांगत्वानुपपत्तेः यूपस्यचपशुयागप्रयो ६६

गात् बहिरुत्पन्नत्वेनाग्रहणप्रमाणाविशेषतया सर्वपशुयागसाधारणपातरशनादीनां यूपांगत्वे सवनीयस्याप्राकृतेपि परि
व्याणांतरे साधारणप्रयोगतेरग्नीषोमीयांगत्वेन साधारणापाठप्रन्नेर्विरोधं सूचयितुमाह॥ एतद्यूपेति॥ रशनया यूपं परिव्ययतीत्य
ग्नीषोमीये विहितात्परिव्याणात् तसद्याद्विनंयहं इहीत्नोपनिष्क्रम्य यूपं परिव्ययतीति सवनीये विहितस्य परिव्याणस्य नैदे पि
लौकिकत्वात् परिव्याणस्य स्वरूपे धर्मविध्ययोगेन यूपान्वयप्रयुक्तत्वात् धर्मान्वयस्य यूपसाधारण्यात् धर्माणामपि साधारण्य
प्रतीतेः परिव्याण इत्येपि रशनायाः सामानविध्यसूचनार्थेण गतावित्यस्माद्धातोरेतेस्कद्वेत्फणादिसूत्रेणेति प्रत्ययस्यानुडा
गमसहितस्य विहितत्वादेति सर्वत्र गच्छतीत्यर्थविवक्षया साधारण्यावाच्येतत्त्वं प्रयोगादेतस्य पशुत्रयसाधारणस्य यूपस्य
यदेकं परिव्याणमग्नीषोमीये परं च सवनीये विहितं तस्योनयस्य साधारणः शेषो रशनाधर्मसहिताः कृत्वाऽवगम्यते अतः ब
हिरुद्देन कर्मणाग्नीषोमीयपशुयागमात्रांगतां न यातीत्यर्थः॥ विप्रकर्षश्लोकद्वयेन दर्शयति॥ यावदिति॥ अति समाख्यावि
रोधं प्रश्नपूर्वमुदाहरति॥ अतीति॥ पौरोडाशिकमसमाख्याते कांडे पठितत्वात्समाख्याविरोधे निहिते दर्शपूर्णमासप्रकरणेव

र्द्धमानत्वात्प्रकरणाविरोधमाशंक्य साधारणपाठस्यैकत्रापि मंत्रविनियोगे विरोधाभावमुक्त्वा प्रकरणाबहिर्भावेपि सर्वार्थत्व
का प्रतीते विरोधापरिहारमाशंक्य नवा विज्ञातलिंगानां प्रक्रियाविनियोजिके तिन्यायेनानुन्मीलितलिंगत्वात्प्रकरणाविनियो
८७ ज्यत्वेक्रमेणादेति चेत्कारेण सूचिते ऽसीत्यस्य च सामर्थ्यं सन्निधावुपसंहृतमित्यनेन न्यायेनात्रापि दृष्टत्वेति पुष्पदर्थवि
षयत्वात्तसन्निहिताभिधायित्वात्क्रत्वेयोगात्तपयमुपदार्थेग्निप्रणयनेनाम्नातमंत्रस्यात्तमंत्राकांक्षेक्रमेणाविनियोगावग
तेः क्रतिक्रमविरोधापत्तिरित्याशंक्य क्रियापदश्रुत्यत्वेनानुन्मीलितलिंगत्वात्क्रमस्य विनियोगाशक्तावुक्तायां क्रियापदश्रु
त्यत्वेपियागानुमंत्रणसमाख्यानात्समामान्यतोयागांगत्वावगमादृश्चिमंत्रस्य क्रमविनियोगोपपत्तिवत्पौरोडाशिकसमा
ख्यानादपि पैत्वेत्यस्यापि सामान्यतः पुरोडाशयागांगत्वेवगते क्रमेणाग्निप्रणयने विनियोगोपपत्तिमाशंक्यानुमंत्रणाख्य
क्रियाविशेषवदिहमंत्रसाध्यक्रियाविशेषानवगमान्नक्रमस्य विनियोगे शक्तिरिति परिहारसत्त्वेपिब्रह्मणोपेत्यक्रमवि राम
निनियोगं क्रमसमाख्ययोभावब्रविरोध इति परिहारसत्त्वनार्थं पुरोडाशस्यैव चेत्फक्तं। विप्रकर्षं दर्शयति तानव्यापीति लिंग ८७

२ लिंगेनापकर्षः क्रमविरोधोदाहरणमित्याह लिंगेति । अनिष्टापादनार्थत्वात्तत्रापकर्षे लिंगैरपरितोषात् तत्रार्थात्त्वजति वचनमिति २
मर

स्य प्रकरणादि विरोधोदाहरणानि प्रतिजानाति । एवमिति । प्रकरणाविरोधं तावदुदाहरति । तत्रेति । विप्रकर्षं दर्शयति । आव
श्वतिं मासे इत्यग्रहण्याः क्रमे पठितस्यैंद्रस्य प्रगाथस्य पूर्वं चैपादाधिकरणाश्रितमुदाहरणमाह । स्थितेति । विप्रकर्षं दर्शयति ।
आवहीति । उदाहरणांतरमाह । अस्येति । परिवीरसि परित्वादेवीर्विशो व्ययंतां परीमं रायस्पोषो यजमानं मनुष्या इति कर
णमंत्रः युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमान इति क्रियमाणानुवादी । मनोतासूक्तस्य प्रकरणाद्व्योति
ष्टोमाद्वपायागे मनोतायां इव विषौ वदीयमानस्याग्नेरत्र इहीति । मनोतोद्देशेनावदीयमानपश्वाख्यहविरर्थत्वेन पैषाद्वपशु
देवतायां मनोतायां शब्दवाच्यत्वा वा गामेन पशुयागाद्वपायागे तैर्लब्धसामान्यसंबंधेन लिंगेनाग्नीषोमीयक्रमं बाधित्वा सवनीयां
गत्वावगमस्योदाहरणत्वं शंकते । कथमिति । श्रुत्या लिंगबाधान्मनोतासूक्तस्य सवनीयांगतेति परिहरति । नेति । कासौ
श्रुतिरित्यपेक्षायां श्रुतिमुदाहरति । एवंहीति । मनोतायां तु वचनादविकारः स्यादित्यग्नीषोमीयपशावतिदेशप्राप्तस्य म
नोतासूक्तस्योहनिरासार्थत्वेनास्याः श्रुतेरख्यास्यमानत्वात् न देवे विनियोजकता युक्तेत्याशंक्याह । अन्यथाहीति । देवकर्मे -

का· धातायाः श्रुतेर्लिंगप्राप्तोत्कर्षनिरासार्थत्वेनंदेक्तार्थत्वसंन्नवेदस्थे वायव्यादावूहनिरासार्थत्वायोगात्तल्लैंगिकोत्कर्षनिरा
६८ सेन च लिंगस्यानादृतत्वे मिहितेर्थानुरुद्ध्यार्थत्वाभावेनान्याय्यतिगदत्वात् बहुवचनांतपाशशब्दवदूहत्वसिद्धेर्मनोता
धिकरणाविरोधाभावाल्लिंगेनोत्कृष्यमाणामनोताकार्यश्रुत्यावारितेत्याशयः ॥ आग्नेय्येवेत्येवकारेणानाग्नेयीनिषेधावगतेः
प्रकृतौ वानाग्नेय्या मनोतायाः प्राप्त्यभावेन निषेधायोगाद्विकृतौ त्वतिदेशप्राप्तायास्तस्याग्नेयप्रथमो मनोतेति मनोतायां वाय
व्यादिविकृतपशुदेवताप्रकाशतारा के स्यस्मादर्थं नोहेदिति वचनं मूहनिषेधाद्वाय्वादिदेवतस्य सूक्तांतरस्य मनोताकार्ये प्रा
प्तस्यैवकारश्रुत्या निषेधोपपत्तेर्वायव्यादिपशावनाग्नेयादिसूक्तांतररूपविकारनिषेधार्थवेयर्थ्यश्रुतिनंदिक्तादाग्नेयसूक्तो
त्कर्षनिरासार्थः स्यादाशंक्य हेत्वेवकारमुपपादयति ॥ द्विदेवत्येपीति ॥ द्विदेवत्ये यद्यप्येकदेवत्याग्नेय्यशक्ता तथापि सैवकार्या
न तूहः इष्टत्वादुच्यारत्यायामेवकारार्थः ॥ द्वितीयायां कार्यैवेत्यर्थः ॥ मंत्रानुवाकस्थानेपि हि सर्वे वृत्त्यादिवाक्यानि समाख्या राम
नाम मंत्रा गात्वस्यायविनियोगाय प्रवृत्तानि संति लिंगेन ग्रहणादिषु विनियुज्यंत इति यत्र मंत्रानुवाकाधिकरणोस्थितं ॥ ६८

नं देके लिंगसमाख्याविरोधोदाहरणं यथाग्निरूळ्हे पुरोहितइत्यादौ नां मनोर्वा पृथुपाजाऽस्तं सवाधइति पृथुपाजवत्योग्नेयाज्या
समाख्याबाधित्वा लिंगेन सामिधेनीकार्ये विनियोगइति लिंगक्रमसमाख्यानां दृष्टाज्योक्तं तद्रूपं रमित्याह· लिंगेति विप्रकर्षेद्दर्श
यितुं भक्षाणं तु रूपसंबंधागमं मुख्यार्थस्य कृत्स्न विस्तामान्नस्यादृशा वोक्तस्य वाको क्षाद्देः कल्पनेयत्नं फलं· बोक्यानि लिंगेन विनि
युज्यंतइति वदता लिंगस्य ह्रस्व मत्र विनियोजकत्वं का· पर्याप्तिक रणमेत्रे परिवीरसि पदव्याप्तिस्फूर्त्या पदी वादेवी विशो व्याप
तामित्यादि पदानां न्नि समाख्यानं वाद्दिमं त्रे बपरिवीतपदव्याप्तिस्फुलानां युवेत्यादि पदानां लिंगेन विनियोजकुमारभ्यमाण
स्या परिवीरसि परिवीतपदास्याएकवाक्यत्वात्स्वचनीयार्थं द्वितीय प्रिपर्याण विनियोगो वाक्यक्रमविरोधोदाहरणं मि
त्याह· वाक्यति· परिवीतपदोत्थापि परिवीरसि पदमप्युपलक्षितं तां सध्या समित्यादिपदेषु लिंगेन ग्रहणं दो विनियोक्
मारभ्यमाणेषु सध्या समित्यादि पदेके वाक्यतागतानां त्रोषाणंपं इह वसंधित्यादि पदानां भक्ष रणादर्वाचीने ग्रहणं हवि
र्वृत्ति विनियोगारव्य वाक्य समाख्याविरोधे उदाहरणं प्रत्याह। वाक्य समारव्य योरिति· ग्रावस्तोत्रीयं पाठे तोऽन्नेया
गार्थवाविद्वान्भक्षुणा अस्मागमनुष्टुपमानत्वात् ततो बर्वाचीने वर्तिनि विनियोग इत्यर्थः। यद्वा भक्षणे ह्रोषणापद

ग. क.

॥ ६१ ॥

णं नाम श्रुतिरविनियोग इति समाख्याप्राप्तभक्षणं गत्वा बाधो वृत्तिप्रतिषेधेनोक्तः। एवं पदमात्रे लैङ्गिकविनियोगापर्यवसानात्तु
र्यवसानेवालिङ्गविरोधिना वाक्येन शेषपदविनियोगायोगात् शेषपदमात्रस्य वक्तृत्वे वाक्यत्वाभावेनाविरोधेऽपि वाक्य
नविनियोगक्रमवाक्यत्वात् पदान्वयरूपस्यैकप--- त्वस्य पदार्थान्वयरूपवाक्यार्थत्वाभावेन वाक्यप्रतिपाद्यत्वाभा
वात् तस्मात् आश्रयदोषापत्तेः आत्मनैवात्मनो विनियोगायोगाच्छेषाणां पदानां लिङ्गविनियोज्यपदार्थोपसर्जनीभूतार्थ
प्रतिपादनशक्तिमात्रेणैकवाक्यत्वादिष्यते। ननु विनियोग इत्यपरितोषादुदाहरणान्तरमाह। तपेति। वेतनस्य क
र्मफलभाक्त्वविनाकर्तृत्वायोगात् समाख्यागतकर्तृत्वस्य यजुर्वेदाध्ययनलक्षणाध्वर्युसंज्ञस्य पुंसः कर्मफलभाक्त्वेनाभि
धान्यावगतेः समाख्यातोऽध्वर्युर्थत्वावगमेऽपि वाक्यावगतस्य स्वर्गकाममात्रार्थत्वस्य समाख्यानुरोधेन यजुर्वेदाध्यायिस्वर्गका
मविषयत्वकल्पनया संकोचायोगाद्वाक्येन समाख्याबाध इत्याशयः। कर्त्रधिकरणे निषेत्स्यमानस्याख्यानेन कर्तृत्वाभिधाना
स्याज्ञानात् श्रुतिसमाख्याविरोधोदाहरणत्वं शंकते। नन्विति। कर्त्रधिकरणसिद्धान्तस्मारणेन निरस्यति। नात्रेति। उपयाजा
दीनां पुरोडाशयागमात्रांगत्वस्य प्रकृतेः प्रधानमात्रांगत्वेन बाधः। प्रकरणे समाख्याविरोधोदाहरणमित्याह। प्रकरणेति।

६१

ऋत्वादीनां शेषमात्रविषयत्वेन शेषिविषयत्वाभावात् शेष्येकोपि शेषभेदः प्रमाणसमवायानुपपत्तेः रूपस्मरणे ऋत्वो मंत्रस्यो ना
दिः स्रुमनस्यमानांतः अयो उपः कल्पयाम्येतो वेत्येकस्मिन्नुपस्तरणाख्ये शेषिणि समुच्चयात् यवरूपयोः शेषयोस्सम
वायपि लिंगवाक्ययोस्समवायायोगात् बलाबलविंतानमुक्तेत्याशंक्य शेषसमवायप्रा प्रमाणसमवाय इत्युक्ते ना
र्थशेषसमवायो दाहरणानि दर्शयिष्यन्विवेकार्थं वत्र वर्तिष्यमाणसंकीर्तनं तावत्करोति एवं तावदिति। ऋत्तेज्ञावद्विगाधि
साध्यं उदाहरन्ति नद्धेति। एवं क्रत्वोर्द्वयमिति ऋत्वेकस्यविरोधात् ल्ताह ऋत्वीति। पूर्ववदपरितोषादुदाहरणान्तमाह। तथे
ति। प्रकरणविरोधमुदाहरति। अतिष्टकामेति। एकविंशतिसंख्याविशिष्टस्यानुवचनांतरस्यात् ऋत्वानमः अवक्रम्यदर्शि

गित्वादन्यतराकांक्षालक्षणेनक्रमेणाचमसस्यांगतागोदोहनेनपशुकामयमानस्यापिदर्शपूर्णमासप्रयोगेसामान्यतःप्रा
प्तावेतान्तुगोदोहनात्तस्मिन्प्रयोगेचमसनिराक्रियेत्यर्थः॥गोदोहनस्यापिक्रत्वर्थप्रणयनाश्रितत्वात्ततः क्रतुप्रयोगान्यत्वबले
नपशुकामस्येतिषष्ठ्यादर्शपूर्णमासप्रयोगव्यतिरेकस्त्रनितत्वांगीकारात्गोदोहनस्यदर्शपूर्णमासप्रयोगांगतायाःप्रासंगि
कोपकारित्वेनोपचरितायाःश्रौतत्वं श्रुतिक्रमविरोधोदाहरणत्वसिद्धयेभिप्रेतं।समाख्याविरोधमुदाहरति।वाजपेयइति।स्वा
राज्यकामस्यकर्त्तुरित्यध्याहारः॥कर्त्रधिकरणपूर्वपक्षेप्युक्तत्वोदाहृतत्वेनेतदपरितोषात्उदाहरणांतरमाह।तथेति।लिंगस्यवा
क्यविरोधमुदाहरति।योनादेरपीति।एकस्मिन्सादनाख्येशेषिण्यनेकसमुदायावयवात्मकशेषसमवायः।प्रथमश्लोकेनैक
कस्मिन्नुपस्तरणाख्येशेषिणिद्वितीयेनोदाहृतः।पुरोडाशव्यापारस्यसदनस्याननुष्ठेयत्वेनाप्रकाश्यत्वात्प्रयोजककव्याया
रसादनलक्षणार्थासदनोक्तिः।हविःसंस्कारार्थत्वेप्युपस्तरणस्यहविराधारपात्राभिमुखव्यापारणरूपत्वेनाभिघारणत्वंविवक्षि
तं।एतयोःसमुदायावयवयोःसर्वदाहृतत्वादविवेकमाशंक्याह।अनेकेति।अनेकयोःशेषिणोरन्योन्यविशिष्टबुद्धिरूपयोरे

तं॰ध कस्यशेषत्वमभिप्रेत्यप्रागुदाहृतौ। संप्रत्येकस्यसादनस्योपस्तरणस्यवाशेषिणोनेकसमुदायावयवरूपशेषान्वयमभिप्रेत्यत्य
७१ र्थः॥ पूर्वार्द्धं श्लोकद्वयेनव्याचष्टे। पूर्वमिति॥ कल्पयाम्यंतस्योपस्तरणवाचित्वान्नस्मिन्नित्याद्येकवाक्यत्वेनसादनांगत्वायोगमा
शंक्यमाभिधारणोक्त्योपस्तरणस्यसादनोपर्जनतोक्ताशेषःसादनविशिष्टेभिघारणइत्याध्याहार्यं। तस्येवोत्तरार्द्धंव्याचष्टे
एकैकस्मिंस्मिति। द्वयोरवयवयोःसमुदायापन्नयोर्वाक्यादिकस्यत्वल्लिंगेनैकस्मिंछेषिणियच्छेषत्वंप्राप्तंतत्संप्रति उदाहरण
त्वेनगृह्यतइत्यर्थः। सादनोपस्तरणाख्यशेषिभेदेनोदाहरणभेदात्तवीप्सोपपत्तिःसमुदायस्यविकल्पेनसमुच्चयेनवाशेषि
त्वेपिविनियोगाययथालिंगंवावयवस्येत्येकस्यैवलिंगवाक्यबलाबलोक्तिप्रकारस्यभाष्यकृतोक्तत्वात्प्रकारचतुष्टयोक्तिर्भाष्ये
नारूढेत्याशंक्याह। एकस्मिन्नेवेति। यद्यप्येकएवमार्गोभाष्यकृतोक्तःतथापिकिंमंत्ररूपस्तरणेपुरोडाशसादनेचप्रयोक्त
व्यउतोपस्तरणइत्येतावताभाष्येणनिकृष्टेनोपस्तरणोक्तेयत्नपुरोडाशसादनमित्येवविशेषणाविशेष्यभावप्रतीतेरुप राम
स्तरणविशिष्टपुरोडाशसादनेस्वप्रधानेवोपस्तरणेप्रयोक्तव्यइत्यनेकयोःशेषिणोरेकशेषविषयप्रमाणद्वयसमवायाद्दे ७१

को मार्गः पुरोडाशसादनेकार्येयदुपस्तरणमिति विपरीतविशेषणविशेष्यभावात्सादनविशिष्टउपस्तरणेप्रधानेवा
सादन इति द्वितीयोपि किंकृतःउपस्तरणेप्रयोक्तव्यउतकल्प्यमानंतदित्येतावतेकस्मिंश्चिदुपस्तरणेशेषिणिसमुदायावयव
रूपशेषद्वयसमवायात्तृतीयः किंकृतः पुरोडाशसादनेप्रयोक्तव्यउततस्मिन्नसीदेत्येवमादिरित्येतावतेकस्मिंश्चित्पुरोडा
शसादनेशेषिणितस्यैवशेषद्वयस्यसमवायाच्चतुर्थइति मार्गचतुष्टयमेकस्मिन्नेवमार्गेप्यसंकीर्णमव्यक्तंप्रतीयतेतद्व्याख्या
तृभिरात्मनाश्रयंविवेक्तव्यमित्यर्थः ॥ लिंगस्यप्रकरणादिविरोधानुदाहरति ॥ लिंगस्येति ॥ लिंगेनप्राप्तेनेत्यध्याहार्यं ॥ वाक्यस्यप्र
करणविरोधमुदाहरति ॥ वाक्येति ॥ शेषद्वयसमवायमुपपादयति ॥ प्रकरणेनहीति ॥ गार्हपत्योपरिहविश्छापनंविधायवेदिक
रणविधानात्विधिपावक्रमेणार्थादवगतस्यहविरधिवासनेप्यन्तरकालस्यप्रकरणेनांगत्वग्रहणमुपपादयितुंविधाने
न्तेः कालाख्यविशेषणप्रधानानुष्ठानलक्षणार्थत्वादुन्तरकालविधानहेतुकस्योन्तरकालस्यग्रहणमित्यर्थः ॥ अमावास्या
ख्यकर्मसमभिव्याहारात्मकेनवाक्येनपूर्वेद्युः कालस्यग्रहणमित्येकस्मिन्नमावास्याख्येशेषिणिकालाख्यशेषद्वयसमवायइ

तं॰द त्याशयः। एवमप्यमावास्यायामिति सप्तमीश्रुत्यैव पूर्वेद्युः कालस्यामावास्यां गत्वावगतेर्वाक्यप्रकरणाविरोधोदाहरणतानुयुक्तेत्या
७२ शंक्याह। नवेति। शेषिणः शेषेणासहसंबंधाख्यशेषित्वं नवदतीत्यर्थः। तावत्यादीक्षणीयायामनुब्रूयादित्यादिवत्सप्तम्यक्तस्याधि
करणत्वस्याधेयव्याप्यत्वात्प्राधान्यादुपकत्वेनसप्तम्याः शेषित्वेप्रमाणतामाशंक्यस्वरादिवत्काललक्षकर्ममध्यपातित्वलक्षणा
धेयत्वाभावात्कालंप्रतिकर्मणोधिकरणत्वायोगोक्तिः। वाक्यप्रकरणाविरोधोदाहरणत्वोपपादनमुपसंहरति। तस्मादिति। बाध्य
बाधकातात्पर्यपादितत्वात्सिद्धवेत्याह। सवेति। क्रमविरोधेप्रश्नपूर्वमुदाहरति। वाक्येति। इतिराजन्यायप्रतिपदमितीतिकरणाश्रु
त्याविनियोगात्श्रुतिक्रमविरोधोदाहरणत्वशंकांनिराकर्तुंपादमात्रमित्युक्तं श्रुतिविरोधात्तर्हिवाक्येनापिद्वितीयादिपादविनि
योगोनयुज्यतेत्याशंक्याविरोधार्थंप्रतीकोक्तिः। ऋग्लोपवद्यवधारयेत्याद्यपादमात्रविनियोगोनोपास्मैगायतानरःपवमानायेंदवेइ
ति देवंइयक्षत इति निनत्पायाः प्रतिपदश्रुत्यकार्यत्वेनाद्यस्यैवपादस्याभिवर्जितत्वात्द्वितीयादिपादविनियोगस्यश्रुत्यविरोधेसति राम
द्वितीयपादात्मश्रुतिकस्याः प्रतिपदःसंबंधिकार्यमित्यपेक्षायांवहिःपवमानस्तोत्रक्रमेपाठादुपास्मैगायतेत्यादीनामृचांबहिष्पवमा ७२

नम्रो ऽगात्वावगतेर्नित्यप्रतिपत्त्यर्थं बिनएव द्वितीयपादादिप्रभृति द्वितीयतृतीयपादत्वं लक्षणाय यथासंख्यक्रमेण विनियोगप्र

सक्ता इति तत्रेत्यनेनोक्तं अथ कस्मिन्नवहिष्पवमानसाम्नि त्रेशोषिणि द्वितीयपादप्रभृतिशेषद्वयसमवायमुदाहरणपूर्वं दर्शयि

तुमाह। दृष्टेति। इति प्रथमं तस्य पदस्य पवमानायेत्यादि निरूढं तु र्थ्यं तैरेकवाक्यतोपगमनासामर्थ्याल्लिंगेन क्रमस्य विरो

धे संभवति ततो न द्वन्येन वाक्येन विरोधोक्तिरयुक्तेत्याशंक्य तेनान्विति। त्सरादिपदवत्पवमानायेत्यादीनामपि सोमलिंगत्वान्न

लिंगविरोध इति परिहरति। नेति। कवाक्यत्वोपगमनशक्यारब्धं तु लिंगमेकवाक्यत्वेन कल्प्यत्वात्कृतोपि लघन्यमित्याशंकाश

यनिरासार्थं दर्शयितुमाह। नि मक्षीति। मरुत्वत इत्यस्यापि च तु र्थ्यंतत्वादेकवाक्यत्वायोगमाशंक्य मरुत्वत इत्यस्य देवतावावि

नो द्वेषेत्यादि इन्द्रवाचिपदानंतर्यान्मरुत्वद्देवत्यत्वेन सोमइत्यस्य स्तुत्यर्थत्वात् सोमस्तुत्यर्थं द्वेषादिपदेकवाक्यत्वोपपत्तिं मत्सरा

दिपदानां चवृषादिपदवत्सोमवाचित्वेन स्पष्टमेव द्वेषादिपदैः समानविषयत्वादेकवाक्यत्वं विप्रकर्षोक्तिमिषेणासूचयितुमा

ह। स्मादिति। मारभ्याविरोधं उदाहरति क्येति। समुच्चयादविरोधशंकां निरासायैकेनेत्युक्तं तत्रेत्यनेन विप्रकर्षस्यानाशंक्य

तं॰र
७३

तोक्ता। प्रथमायाश्चाप्यभिहितकारकविभक्तित्वादितिकर्त्रधिकरणवार्त्तिके प्रथमायाः कारकविभक्तित्वस्य वक्ष्यमाणत्वात्प्र १
थमाश्रुतेः समाख्याविरोधमाशंक्य कर्त्तरि प्रथमाश्रुत्यभावात् आख्यातसामानाधिकरण्यान्यथानुपपत्त्या च प्रातिपदिकस्या
ख्यातोक्तभावनाक्षिप्तकर्तृत्वावगमात्तद्योग्यार्थवाचितया प्रथमया द्योतनावगमात्तदाशयत्वेन कर्त्रधिकरणवार्त्तिकोपप
त्तेः प्रथमायाः कारकविभक्तित्वाभावान्न श्रुतिविरोधवादिना ख्यातस्य कर्तृत्वाचिताव्याकरणमतेनाप्यपगतत्वेत्यापाद्य तद
संभवोक्त्या निरस्यति नन्वेति। प्रकरणस्य क्रमविरोधमुदाहरति क्रमेति। पूर्वश्रुतिवाक्यविरोधविषयत्वे नास्योदाहृतत्वात्क्रमप्र
करणविरोधोदाहरणत्वायोगमाशंक्य स्तोत्रापेक्ष्येत्यन्तात्तत्प्रपंचनायामिष्टोमेत्यन्तं। सामशब्दो न स्तोत्रवाची पूर्वं किमपेक्ष्य
येत्याशंक्य यज्ञायज्ञायसामापेक्ष्येत्याह। पूर्वं त्विति। समाख्याविरोधमुदाहरति। प्रक्रियेति। वाक्यसमाख्याविरोधविषयतया
स्योदाहृतत्वात् प्रकरणसमाख्याविरोधोदाहरणत्वायोगमाशंक्य ज्योतिष्टोमं प्रतीत्यन्तात्तस्य हीत्यादिना विविक्तविषयत्वं वि राम
वृतं। क्रमसमाख्याविरोधं प्रश्नपूर्वमुदाहरति क्रमेति। लिंगेनापि कर्मद्वयोगात्वापत्तेः लिंगक्रमविरोधोदाहरणत्वमाशंक्याह॥ ७३

लिंगं त्विति। सामान्यसंबंधापेक्षत्वेन लिंगस्यान्यतश्च सामान्यसंबंधानवगतेः क्रमसमाख्ययोर्मध्ये यद्बलीयस्तदपेक्षत्वात्तु बा-
धेन विनियोजकत्वं न संभवतीत्याशयः। श्रुत्योः समवाये पारदौर्बल्यमर्थविकर्षात् लिंगयोः समवाये पारदौर्बल्यमर्थविकर्षा-
दित्येवमादिसूत्रार्थास्वरूपमात्रेण सजातीयबलाबलप्रदर्शनं सुखग्रहणार्थं सूत्रानुकीर्तनपूर्वं प्रतिजानाति। एवमिति। शेष-
कत्वे साक्षाच्छेषभेदे च शेषिकत्वे शेषसमवायद्वारा श्रुत्यादीनां विजातीयैः समवायस्यापि इति तत्वोक्त्या सजातीयसमवायस्यापि
द्वैधापितत्वं सूचितं। कारणदोषज्ञानपूर्वत्वान्मिथ्यात्वस्य ज्ञानाप्रमाणी नतस्य च शब्ददोषस्यापौरुषेयत्वाद्वेदे त्वनुपपत्तेः वेदार्थ-
ज्ञानस्योत्पन्नस्य मिथ्यात्वज्ञापनलक्षणबाधायोगात् सामान्यशास्त्रादीनां बाधायोगमाशंक्य लिंगादिवत्सामान्यशास्त्रादेरपि
ज्ञेयासद्रूपतासप्रकाशनलक्षणपरिच्छेदफलविज्ञानोत्पादकत्वप्रतिबंधलक्षण एव बाधो न मिथ्याज्ञानोत्पादकत्वज्ञापनल-
क्षणः। प्राप्तबाधो क्लिष्टबाध ग्रंथे वक्ष्यमाणज्ञानमात्रोत्पादकत्वाश्रयेति सूचयितुं यथा चेत्युक्तं। श्रुत्युदाहरणानि। तावद्
द्दर्शयितुं सामान्यविशेषसंदिग्धासंदिग्धयोर्वाचार्यविरोधादिविषयत्वेन भिन्नायाः श्रुतेरेकस्मिन् शेषसमवायो दर्शनीय इत्या

तं॰र हान्यथेति। सामान्यविशेषश्रुत्योरेवतुर्द्धाकरणाख्यशेषविषययोर्विरोधमुदाहरति। पुरोडाशमिति प्राप्नुवदित्यनेनप्राप्न
७४ वाधूः। सूचितः। एकस्मिन्नवघातहोमेशेषिणि आहवनीयाख्यशेषद्वयसमवायेसामान्यविशेषश्रुत्योर्विरोधमुदाहरति।
तथेति। अपूर्वत्वेनावभृथेचतुरवत्तहोमाप्राप्तेः आहवनीयप्राप्त्ययोगमाशंक्यातिदेशतोहोमप्राप्तावप्यवभृथेजुहोतीति
उपदेशादेवप्राप्तिंदर्शयितुंजुहोतिसामान्योक्तिः। एकस्मिन्नेवैश्वदेवयागेशेषिणि वाजिभ्यो वाजिन इति चतुर्थीपंचमीरूपेणासं
दिग्धायाःश्रुतेर्वैश्वदेव्यामिक्षेत्यसंदिग्धतद्धितश्रुत्याविरोधइत्याह। संदिग्धेति। एकस्मिन्नन्यानिष्टोमेशेषिणि पूर्वोत्तरयूपच्छेद
निमित्तादाक्षिण्यपरप्रतिहर्त्रपच्छेदनिमित्तसर्वस्वदाक्षिण्यरूपशेषद्वयसमवायेपूर्वशेषविषयाद्दाक्षिण्यश्रुतेः यदुद्भ्ये निवा
क्येचेकस्मिन्नपवर्गिणि शेषेसोमेलिङ्गश्रुत्योः समवायेंगगुणविषये। लिङ्गश्रुतेरेकस्मिंश्चश्येनयागेशेषिणि प्राकृतबर्हिर्वैकृतशराख्य
शेषद्वयसमवाये प्राकृतबर्हिर्विषयायाबर्हिषिहविर्षि आसादयतीतिवर्हिःश्रुतेः प्राकृयाप्तत्वेनविप्रकर्षायोगात् बाध्यत्वायोगमा राम
शंक्यविप्रकर्षाभावेपिविज्ञानोत्पादकत्वंविनाप्रामाण्याभावात्तात्पर्यावधारणंचविनाविज्ञानोत्पादकत्वाभावात् बलवद्विरोध ७४

परिहारं च विना तात्पर्यस्यावधारणाभावात् विषयपरिच्छेदकरूपज्ञानोत्पत्त्यज्ञानविविशेषोत्पत्तिप्रतिबंधलक्षणां कृतविरोधि
बाध्यत्वसंभवं सूचयितुमाह। एवमिति। प्राक्तनवैकृतविरोधग्रहणायाच्छिशङ्क्यः। एकस्मिन्नसंख्यात्मिन्नावनात्मचशेषपदेका
भिधानकृत्वाः समवाये पदकृतेरेकाभिधानकृत्वाबाधं श्लोकद्वयेनोदाहरति। तथेति। लिंगद्वयस्यैकस्मिंश्चेषशेषविशेषद्वयस्य
चैकस्मिंश्चेषिणि समवाये पदकृतेरेकाभिधानकृत्वद्वयसमवायेशेषद्वयस्य चैकस्मिंश्चेषिणि समवायस्यानभिमतत्वेनोदाहरणमि
त्याह। तथा लिंगेति। किमत्र लिंगद्वयमित्याकांक्षायामाह। देहीति। कोनयोर्विशेषद्वत्याशंक्याह। एकस्मिन्नेवेशपदप्रयोगेशेषिणिपां
चदशपसाप्रदर्शनात्विशेषद्वयसमवायेवाक्ययोर्विरोधमुदाहरति॥ वाक्ययोरिति। उदाहरणात्वोपपादनपूर्वविशेषमाह। उभय
त्रापीति। सामान्यकृतिवत्सामान्यवाक्यस्यापि विशेषविषयविज्ञानोत्पादने सामर्थ्यादिप्रकर्ष इत्याशयः। एकस्मिन्नभिकृ
मणोशेषप्रकरणयोः समवायमुदाहरति। प्रकरणयोरिति। विरोधोपपादनं पूर्वविशेषमाह। महाप्रकरणेनहीति। संदंशान्नि
वाक्याचांतरप्रकरणस्थस्यांगस्य संदंशभूतकृत्यादिसंयुक्तत्वेन महाप्रकरणग्राह्यत्वाभावमाशंक्यात्यामवांतरप्रकरणं गान्याय
५ नवेति। नदेशोर्थविप्रकर्षेपि यस्योनंतद्रसस्य प्रसद्गंसादनाभिधानसामर्थ्यमित्यादिनाष्येणविशेषद्रढयितुमाहरतीति। ५

तं·र वक्ष्यमाणादवांतरप्रकरणिनः प्रयाजादेर्महाप्रकरणस्य दर्शं विनानिक्रमणादेर्महाप्रकरणस्य दर्शानुपपन्नेऽप्रमननुभूयैवावांतरप्रक
७५ रणपठ्वयः प्रत्यासत्तेर्बलवत्वाज्ज्ञानीयत्वात् पूर्वं भवतीत्याशयः ॥ क्रमः आद्यस्य युगलस्य द्वितीयस्य च पौर्वापर्ये क्रमेणः पूर्वत्वात् द्वितीयस्य
आद्यात् परत्वात् पौर्वापर्यक्रमेणाद्यस्य द्वितीयं गत्वावगते यथासंख्यक्रमेण नाद्यं गत्वावगते द्वितीयस्य च पौर्वापर्यक्रमेणाद्यं
गत्वावगते यथासंख्यक्रमेण च द्वितीयं गत्वावगतेरेकस्मिन्नाद्ये द्वितीये वा शेषे क्रमद्वयसमवाये पौर्वापर्यक्रमेणाद्यस्य यथासं
ख्यक्रमेण च द्वितीयस्य द्वितीयस्य द्वितीयं गत्वावगते द्वितीयस्य च पौर्वापर्यक्रमेणाद्यस्य च यथासंख्यक्रमेणाद्यं गत्वावगते
रेकस्मिन्नाद्ये द्वितीये वा शेषे विशेषद्वयसमवाये क्रमयोर्बलाबलमुदाहरति ॥ क्रमयोरिति । स्थानदेशपञ्चकणस्यैव क्रमस्य विनियोजकत्व
प्रकृपमात् पौर्वापर्यस्य क्रमत्वानावसाशंक्य संनिधिरूपत्वेन क्रमस्य विनियोजकत्वात् पौर्वापर्यस्यापि संनिधिरूपत्वाविशेषेण वि
नियोजकत्वसंभवेप्यबाधितपौर्वापर्यदर्शने विनियोजकत्वाभ्युपगमाद्दूस्यावनेजनोपलेपराजिरणादिपौर्वापर्यवद्धप्रकरणा राम
दिनाबाधासंभवाद्यथासंख्यक्रमेणाबाधे विनियोजकत्वोपपत्तेस्तेन बाधः संभवतीति वेति संप्रधारणायुक्तेति परिहारसूचनार्था ७५

प्रत्यासत्त्युक्तिः। एकस्मिन्पोत्रीयाख्ये कर्मणि शेषिणि पोत्रद्वयाख्यशेषद्वयसमवाये पोत्रीयमिति विशेषसमाख्यया आध्व
र्यवमिति सामान्यसमाख्यया बाधस्तस्येति सप्तमपादस्थसूत्रबद्धः समाख्याद्वयविरोधोदाहरणमित्याह। समाख्ययोश्चेति। संदि
ग्धासंदिग्धश्रुत्याद्युदाहरणेषु मध्ये कैकस्मिंछेषप्रमाणद्वयसमवाय इत्याशंक्यास्मदुक्तप्रकारं विवेकं सूत्रयितुमाह। शेषेति॥
उपकारपृष्ठभावेन पदार्थवच्छेद्यानामप्यतिदेशानुपगमादानुमानिकेष्वपि श्रुत्यादिषु बलाबलस्य विचार्यत्वं द्वादशानुकीर्त्तन
पूर्वं प्रतिजानाति। एवं तावदिति। एतदेव विवृणोति। तावेति। शरमयं बर्हिर्भवतीत्यादीनां प्रत्यक्षागम्यानां श्रुत्यादीनां बर्हिःप्रिहवी
ष्णासादयतीत्यादिभिः शेषेणेऽनुमानगम्यैः श्रुत्यादिभिः सह पशौ चानुमेयानां प्रयाजादिविषयाणां श्रुत्यादीनां पशुपुरोडाशेप्र
याजादिविषयैरानुमानिकैः श्रुत्यादिभिः सह बलाबलमनुत्पन्नमेव वचेद्धश्रुत्यप्रमावाक्षेषज्ञानं बाध्यत इति पूर्ववार्त्तिकोक्तेनमा
र्गेण व्याख्येयं इत्यर्थः। कीदृग्व्याख्येयमित्यपेक्षायां प्रत्यक्षाणामानुमानिकैः सजातीयैः सह विरोधे प्रत्यक्षाणां बलीयस्त्वमाह।
तद्यथेति। विजातीयविरोधे पूर्वस्यापि श्रुत्यादेरानुमानिकस्य परेणापि लिंगादिना प्रत्यक्षेण बाध इत्याह। विपरीतोपि चेति। यथा

तं.र. कृष्णलेषुकृष्णलानवहंतीत्यूहसहायातिदेशानुमितश्रुतिप्राप्तोवघातास्तुषकणविमोचनसामर्थ्येनप्रत्यक्षेणानुग्रहरहिते
७६ षुकृष्णलेषुशक्यत्वावगमानुबाध्यतःइत्युदाहरणमाहयथेति।लिंगंमंत्रेषुवचनसामर्थ्यमितिप्रकरणाधिकरणोपक्रमसा
र्थ्यमंत्रसामर्थ्यस्यलिंगत्वाभिधानात्कृष्णलातस्यसामर्थ्यस्यलिंगत्वंनास्तीत्याशंक्याहसर्वेति।लैंगिकेणाणमुख्यार्थविषयवि
नियोगप्रकारचिंतायांमंत्रातिरिक्तविषयत्वायोगान्नदनुकीर्त्तनार्थत्वात्तल्लैंगिकमंत्रविनियोगसिद्ध्यर्थलिंगविशेषलक्ष
णंतदित्याशयः।सामर्थ्यमात्रस्यलिंगत्वेनाभ्युपगममतिमाहतथाचेति।प्राप्तुमनन्यप्रापकंविवक्षितत्वाल्लिंगदर्शनोक्तेःप्रापकोपि
दुलनार्थत्वाद्यप्रापकमनेनलिंगेनोपोद्बलनीयंतत्किमितिदृष्टे।न्नन्यथासंभवोक्त्यानन्यगतिलक्षणासामर्थ्यपरतायाःप्रा
पकत्वाभिधानात्सामर्थ्यरूपत्वात्लिंगस्यमाध्यकृतोभिमतात्वाग्भतइत्याशयः।।तत्वतन्यार्थदर्शनस्यप्राप्तासमर्थत्वाल्लिंग
त्वंतस्यतुश्रुतिविरोधेबाधोस्तिनवेतिष्टश्रुतिपत्रपुनरितिसंदेहोपपादनार्थंश्रुतेरानुमानिकत्वेलिंगस्यचप्रत्यक्षत्वे राम
भिहितेकृष्णलाघवातवदेवतर्ह्यनियाथानुमानिक्याःश्रुतेःप्रत्यक्षलिंगबाध्यत्वसिद्धेःप्रश्नोनयुक्तइत्याशंक्यातिदेशानु ७६

मेयायाः श्रुतेः वैकृतप्रयोगवाक्यैकवाक्यतयानुमेयत्वाभ्युपगमात् समस्तप्राकृतवैकृतांगप्रापकश्रुत्यादिप्रमाणपर्यालो
चनयानुमीयमानायां श्रुतौ विरोधपरिहारार्थं बलवत्प्रमाणविरुद्धार्थविषयतयानुमानादशाहरूपस्य वांगस्य गौणसाम
र्थ्ययोगादसमर्थस्य व विनियोगायोगादवघातविषयप्रत्यक्षसामर्थ्यरूपलिंगानादरे विनियोगानुपपत्तेस्तस्याः श्रुतेः
प्रत्यक्षलिंगबाध्यत्वसंभवेपि स्मृत्यनुमेयायाः श्रुतेः स्वातंत्र्येणापठ्यमानतयानुमेयत्वाभ्युपगमेन प्रत्यक्षश्रुतितुल्यत्वावगमा
द्भर्मेनुनोजनितादंप्रतीकर्हेवस्त्वष्टासविताविश्वरूपइत्यादेस्तु मातुलदुहितृपैतृष्वसेयीविवाहादिद्योतनार्थस्यान्यार्थदर्श
नसामर्थ्यरूपस्य लिंगस्यानादरेपि पैतृष्वसेयीं मातुलसुतां सगोत्रां च परिणीय चांद्रायणं चरेत् परित्यज्यैनां मातृवद्बिभृयादि
ति स्मृत्यनुमेयया श्रुत्या मातुलदुहितृपैतृष्वसेयीविवाहनिषेधादेरशक्यत्वाभावाद्वैषम्यसूचनार्थं यथेत्युक्तं॥ ॥उत्तरमा
हत्येवेति॥ ॥प्रत्यक्षश्रुतिविरोधेपि स्मृतिमूलश्रुतिकल्पनाया दुर्वारत्वस्यैतावत्विह वक्तव्यमित्यादिविरोधाधिकरण
वार्त्तिकोक्तत्वेन लिंगविरोधे मूलांतरशंकाया दूरोत्सारितत्वादयथाश्रुतार्थश्रुतिमूलत्वं मूलांतरो न्याभिप्रेतं। यमेनस्वम

तं·
७१

णिनौ यमी प्रति आवयोर्गर्भे दंपती प्रजापतिर्जनितेत्यभिधानाद्वा त्वष्टा जनित्यपत्ययोरन्योन्यं दांपत्यो चितत्वद्योतकत्वे अभिमत
स्य गर्भेऽवस्थितिलिंगस्यैवेवक्षुतयोर्यमयम्योः संवादः षष्ठ्या ऋचिर्यमी मिथुनार्थं यमं प्रोवाच सतां नवमी युग्मेरतिकम्प्र त्याच
ष्ट इति शौनकस्मृतेर्गर्भे स्थितत्वः पंचमी त्वेनायुक्ता द्यम्याः अभ्रातरं यमं प्रति मगर्भस्थावेवावां दंपती जनितेत्यभिधानार्थं तया
भ्रातृ मगिन्यपत्ययोर्दांपत्यो चितत्वद्योतकत्वायोगमाशंक्य समस्तरूपांतरानवच्छिन्नतरेयोगर्भस्थजातयोर्भावत्स्त्रीपुंसयो
र्दंपतितावश्यंभाविनी तद्रूरमावयोरेवान्योन्यसंपर्का द्योगर्भोऽभविष्यत् तिजातयोः स्त्रीपुंसयोर्दंपतिता स्थितैवं यमीवचन
त्वेऽपि भ्रातृभगिन्यपत्ययोर्दंपतित्वोचितत्वद्योतकत्वाविरोधसूचनार्थं न त्वित्युक्तं आयाहीन्द्र पथिभिरालितेभिर्यज्ञमिमंनो
भागधेयं जुषस्व त्वष्टां जङ्मामातुलस्येव योषा भागस्ते पैतृष्वसेयी वपामिवेति अस्या मृत्तूप विष्ट तसेकत्वप्रवपारब्धभागधेयं
जुषस्वेत्युक्ते वपायाः सेव्यत्वलक्षणा तां भागलक्ष्मी तेनोपपाद यितुं यथा मातुलस्य योषा हृत्पंजुङ्गाहृत्वा द्यमपत्यं तथा यथा पैतृ राम
ष्वसेयी पुंसो भागोऽभजनीया सेव्या तथा वपा तव स्नेय्येत्यभिधानं स्कंचो व्यूहति प्राचीं जुहू प्रतीचीं वा सुपभृतमिति स्कंचो व्यूहनविधि ७७

वाक्यशेषेचसमानादेवपुरुषादन्नाद्याश्चजायतइत्यनेनैकस्मात्पुरुषादन्नाभोक्ताःपुरुषसंतानोद्यश्चभोग्यःस्त्रीसंतानोजा
यतइत्युक्तेभ्रातृभगिन्योरेवभोक्तृभोग्यतेत्याशंकानिरासार्थमुत्तरतृतीयेसंगच्छामहेचतुर्थेसंगच्छामहाइतियदेवंदीव्य
मानाजात्याश्चासतइत्यनेनैकस्मात्पुंसोजाताभ्यांभ्रातृभगिनीभ्यांद्वितीयास्तांश्चभार्यापतिसंसृष्टाःस्यामेकस्मात्पुमान
न्यस्मात्स्त्रीत्येवंजातेतृतीयेततोवाजातेचतुर्थेविवाहाख्यांसंगतिंकुर्महइत्येवंदीव्यमानाःक्रीडमानाःश्लाघमानाःजात्याःकु
लीनाअपियस्माद्दासतेतस्मादेकस्मादेकस्माउक्तोभोग्यश्चजायतइत्यभिधानंभ्रातृभगिन्युपत्योर्दंपतित्वौचित्यद्योतकंलिं
गमनन्यगतित्वात्स्मृतिंबाधतेतस्मात्तुत्रिःकाकरणोदुहितुःषष्ठागोत्रानिवृत्त्यभावात्सापिंड्यानिवृत्तेरविप्लुतब्रह्मचर्योलक्षण्यां
स्त्रियमुद्वहेत्। अनन्यपूर्विकांकांतामसपिंडांयवीयसीमितिचसपिंडोद्वाहनिषेधात्तद्विषयत्वेनपैतृष्वसेयीमातुलसुता
परिणयननिषेधस्मृतिर्व्याख्येया। अतएवपैतृष्वसेयांभगिनींस्वसीयांमातुरेवचामातुश्चभ्रातुरात्तस्यगत्वाचांद्रायणंचरे
दितिगमनेप्रायश्चित्तमुक्त्वाएतास्तिस्रस्तुभार्यार्थेनोपयच्छेत्तुबुद्धिमान्। ज्ञातित्वेनानुपेयास्ताःपतंतिह्युपयन्नधइतिपैतृष्व

तं॰र सुष्यादिपरिणयननिषेधे ज्ञातित्वेसपिंडताख्याहेतुत्वेनोक्तः। भगिनीत्वस्यात्र पैतृष्वसेयाविशेषणत्वाभावेयत्तु ह्यापन्नेरेता
७८ न्निसत्त्वस्थित्यनुपपत्तिप्रसंगात्पितृष्वसुः पुत्रिकाकरणे तृतीयः पुत्रः पुत्रिकेवेति पुत्रिकायाः पुत्रत्वस्मृतेः भ्रातेव पुंसए
त्रिवीतिमंत्रेवा भ्रातृकादुहिता पुत्रिकाकरणात्पुंसः प्रतीचीनं पुत्रत्वं गच्छतीति पुत्रिकायाः पुत्रत्वदर्शनात्पुत्रिकायाः भ्र
भ्रातुः पुत्रं प्रतिपितृष्वसृत्वापत्तेः पितृष्वसुर्दुहितुश्च भगिनीत्वप्रसिद्धेर्भगिनीत्वविशेषणेन पुत्रिकायाः पितृष्वसुर्या दुहिता पैतृष्व
सेयीतिप्रतीतेर्मातृभ्रातुश्चाप्तत्वविशेषणेन पुत्रिकामोर्यो तुर्यो भ्राता प्रः सपिंडस्तस्य दुहितरं गत्वेत्यर्थावगमात्पैतृष्वसे
यीमातुलदुहितृपरिणयननिषेधः पुत्रिकाकरणविषयो निश्चीयते। वसुदेवांगजाताचक्रौ तेयस्य विरुद्ध्यते इत्यादिवार्त्ति
कत्वमुपेत्यवादमात्रत्वेन व्याख्येयं। मातुलदुहितृपरिणयनस्याश्यपविक्रयादिवद्दुराचारत्वस्मृतेः पितृसंतानेम प्रमान्मा
तृसंतानेवपंचमादर्वाक् पुत्रिकाकरणाभावमनिच्छित्यपरिणयनविषयेति सर्वमनवद्यं। न केवलमानुमानिकस्येवश्रुत्या राम
देः परेणलिंगादिनाप्रत्यक्षेणाबाधः किंत्वानर्थक्यापत्तेः प्रत्यक्षस्यापीत्याह सर्वत्र चेति। विपरीतबाधोदाहरणार्थं साधनविशे ७८

षलक्षणार्थजातिरध्यवसीयते व्रीहिजातिलक्षितं यत्साधनं किं तद्यत्तण्डुलान्नवंति तत्त्वोक्षितत्वमिति तं डुलनिर्वृत्तिकर
णात्ताहि साधनं तं न द्रव्यते ति नव मा धिकरणं साध्यमर्थतः पठति तददिति। श्रौतं व्रीहिस्वरूपमनादृत्य प्रकरणागम्यापूर्वसाधनं
शलक्षणो त्सजति नाविद्धक्षिता। प्रमेयाख्यायां श्रयबलाबलवैपरीत्यादपि प्रमाणबलाबलवैपरीत्यं भवतीत्याह तथेति। लोक
व्याचष्टे सर्वेति। एतदेव लोकप्रसिद्ध्योपपादयति तथा चेति। श्रुतिलिंगविरोधोपपादनमाध्यस्यसूत्रेण समवायोपपादना
र्थत्वसूचनार्थं द्रवद्भिष्यमाणां कीर्त्तनं करोति एवमिति। किं तावदित्यादि पूर्वपक्षभाष्यं लिंगस्य श्रुत्यपेक्षत्वेनासंभवदर्थ
विषय प्रतिज्ञानुपपत्तेरयुक्तमाशंक्योपपादयितुमाह तत्रेति। श्रुत्यपेक्षत्वाभ्युपगमेपि यस्मिन्विषये विरोधो नास्ति तस्मि
न्नयंल्लिंगस्य श्रुतिकल्पनहेतुभूतं समवेतार्थाभिधानसामर्थ्यं करणाभाव नं स्वरूपं तस्य विरोधविषयेपि तुल्यत्वात् श्रुतिकल्पना
विघातात्तुल्यबलत्वोपपत्तिं प्रदेशान्तरेत्यनेनोक्ता यथा श्रुतेर्विरोधाविरोधयोः क्लृप्तं रूपं तथा लिंगस्यापीति श्रुति दृष्टां
तेन लिंगस्य स्वरूपतुल्यत्वं द्वयोरप्रीत्यनेनोपपादितं। पूर्वार्द्धं व्याचष्टे श्रुत एवेति। श्रुतिलिंगजन्ययोर्ज्ञानयोः क्लृप्तरूपत्वेन श्रु

तं·र तितुल्यत्वोपपादनार्थं नहीति भावः । श्रौतविनियोगान्यथानुपपत्तिकल्पितया गार्हपत्योक्तिशक्त्यैन्द्र्योक्तिशक्तिबाधाद्भक्त्या
७९ स्य लिंगरूपवैकल्पेन लिंगस्य ज्ञानानोत्पादकत्वानुपपत्तेरयुक्तमाशंक्योपपादयितुमाह । नहीति । रूपोक्त्याशक्त्यभिधानाद
ज्ञानशक्तिकस्य मंत्रस्य विनियोक्तुमशक्यत्वात् विनियोगान्यथाभक्तिशक्तिनिरूपणा कार्यद्वारसिकेंद्रोक्तिशक्तिज्ञानितेंद्रांग
त्वज्ञानबाधान्नशक्योत्पत्त्यर्थः । लिंगजन्यस्य ज्ञानस्य सविचिकित्सत्वाल्लिंगस्य बाध्यत्वरूपशंकार्थं नन्विति भावः । लिंगादपि संदेहा
त्मविचिकित्सानुत्पत्तेरयुक्तमाशंक्य विक्षेपार्थत्वेन विचिकित्सोक्तिं व्याख्यातुमाह नन्विति । अतः प्रामाण्यादिक्षेपानुपपत्ति
माशंक्य नहीत्युक्तं । नतदिति परिहारनाचं क्रत्वपेक्षत्वेन कुतश्चिल्लिंगात् निर्विक्षेपप्रत्ययायोगादयुक्तमाशंक्योपपादयि
तुमाह परःपुनरिति । भवतु लिंगात्सत्यप्रद्युतिसाध्यात् लिंगेन ज्ञानोत्पादनं सिद्धान्तिनाभ्युपगतत्वात् ऐक्यमिति कंथ्रां त्यागृहीत्वा
ज्ञानस्योत्पन्नस्य विक्षेपेऽपि दोषाभावेन सविक्षेपत्वाद्व्यस्य सविचिकित्सत्वस्याबाध्यत्वात् संदेहो विपर्ययोऽनध्यवसायो वा सद राम
सज्ञासाधारणज्ञानरूपो विचिकित्साशब्देनोक्त इति मत्वा संदिग्धबुद्ध्यभावान्नेतदेवमिति बाधकाभावेन च विपर्ययायोगात्या ७९

रिशेषादिंद्रांगत्वलक्षणोऽडीत्वसदसत्वयोर्मध्येऽन्यतरानिश्चयरूपोनध्यवसायएवविचिकित्साशब्दवाच्यइत्यापद्यते। निवेश
नःसंगमनोवस्तुना मिथ्यादेरिंद्रो नतस्योभमरेपथीना मिस्तु प्रमानत्वेनेंद्रा मिधानादनवधारितेंद्रांगतया लिंगादिंद्रांगत्व
स्यसदसत्वानिश्चयरूपोनध्यवसायाख्यो भवति तस्या विरोधेपि विषयसदसत्वान्यतरपरिच्छेदफलविज्ञानरूपत्वाभावेनाप्रा
माण्यात्तबलाबलचिंतानुपपन्नेर्बाध्यत्वेपि न पूर्वपक्षहानिः। यतस्त्वक्कदाचनेतिस्पष्टेंद्रलिंगात् इंद्रदेवत्योयंमंत्रो भवत्येवेति एवं
सत्वनिश्चयरूपो निर्विचिकित्साख्यः प्रत्ययो भवति सप्रामाण्याविशेषाद्विकल्पितुमर्हतीति पूर्वपक्षाशयेत्यर्थः। नन्वितिशंकाभाष्यग्र
तिविरोधेमंत्रस्यैंद्रपरत्वायोगात् विज्ञानोत्पादकशब्दसहकारितात्पर्यावधारणाभावेनविज्ञानापर्यायाध्यवसायाख्यनिर्विचि
कित्सत्वानुपपन्नावप्यविरोधेतदुपपन्नेरयुक्तमाशंक्यसविचिकित्सो हीति भाष्यवदिहापि विक्षेपार्थाविचिकित्सोक्तिरित्येवंद्या
त्रस्थेनरस्थिति। काममित्यादिनलिंगंविनियोजकमित्युक्तं तंशंकाभाष्यं सिद्धांतिनः सार्वत्रिकलिंगाप्रामाण्यानुज्ञानोत्पादयुक्त
माशंक्यविरोधेतावत्प्रामाण्यंनास्त्येवेत्येवमर्थत्वं कुपितोक्त्यास्वयमनूद्यावष्टेसिद्धांतेति। विचिकित्सोक्तेर्विक्षेपार्थत्वव्याख्याया लिंग
२ नन्विति। नेतदितिपरिहारभाष्येविक्षेपेप्यविरोधिश्रुतिकल्पनोत्तरकालीनप्रामाण्यसंभवादयुक्तमाशंक्यानध्यवसायाख्यविचिकित्सात्वायत्वेनव्याचष्टे २

त.र श्रुवाप्राप्तबाधोक्तेरेतज्ज्ञानाप्रामाण्यविरोधं शंकते कथं पुनरिति यद्यपि सविचिकित्सोऽन्यः सविकल्पतोच्यते ततः कथं नाप्रामाण्यज्ञानासविकल्पत्वं स
८० विचिकित्सशब्दवाच्यत्वेन परित्यज्य संशयो यः सविचिकित्सशब्दवाच्यत्वेन लोके प्रसिद्धः स एवात्र सविचिकित्सत्वेनोच्यते लिंगस्य
चाप्राप्तबाधाभ्युपगमे कथं लिंगपरिज्ञातत्वं नाप्रामाण्यज्ञानतोच्यते तेनास्मिन्नपि ग्रहद्वये नाप्रामाण्यविरोधो वार्त्तिकस्य त्वाशयः। चशब्दार्थे
चाशब्दः। कृत्पूर्वविरोधे लिंगविनियोगस्य समंजसत्वमुख्यार्थतात्पर्यावधारणाल्लिंगस्यांगत्वरूपार्थविषयपरिच्छेदकविज्ञानोत्पा
दकत्वेऽपि विरोधे तात्पर्यानवधारणात् शक्तिप्रकरणाम्नानलक्षणालैंगिकज्ञानमात्रोत्पादकसामग्रीसद्भावेऽपि विषयपरिच्छे
दकरूपज्ञानविशेषात्मकविज्ञानोत्पादकतात्पर्यावधारणाख्यसामग्र्यभावात् सदसत्त्वसाधारणज्ञानरूपोऽनध्यवसायाख्यः संशय
एव प्रतिभादितुल्यो यस्माद्भवति तस्माद्यद्यपि पूर्वपक्षिणा कोऽपि नाविरोधेऽपि प्रामाण्यं स्यात् तेन तथापि नत्दरमंगीकुर्मः न तु विरोधेऽप्रा
माण्यमित्येवमर्थत्वाज्ज्ञानस्य न तद्विरोधाख्यो दोषो वार्त्तिकस्याभीष्टो हन्त इति। ज्ञेयसत्त्वानिश्चयतुल्यत्वात् संदिग्धत्वोक्त्यान राम
ध्यवसाय एवोक्तः। शक्तिप्रकरणाम्नानमात्रस्य च लैंगिकज्ञानसामग्रीत्वाभ्युपगमेन विरोधेऽपि ज्ञानमात्रोत्पत्तिनिरुक्ता तत्कृतज्ञ ८०

श्रुतिकल्पनां विना लिंगस्य विनियोक्तृत्वायोगात् । आकांक्षां च विना श्रुतिकल्पनाशक्तेः । आकांक्षाया अपि सामग्रीत्वावगमात् प्र
त्यक्षत्वाच्च श्रुत्याद्यन्यत्र विनियुक्तस्य मंत्रस्याकांक्षानिवृत्तेः सामग्र्यभावेन ज्ञानमात्रस्याप्रयुक्तत्वायोगात् प्रामाण्यशंकैव नास्तीत्य
भिधानार्थं यद्दिवेत्यादिभाष्यावयवं व्याचष्टे । यद्दिवेति । सामान्यतो लिंगमात्रप्रामाण्येऽप्यर्थमंत्रेत्यादि प्रमाणमित्यंतं परिहारभा
ष्यं सिद्धांतिनां सार्वत्रिकप्रामाण्यानपह्नववादयुक्तमाशंक्य काममित्यादिभाष्येण सिद्धांतिना विरोधविषय एव प्रामाण्यं शंकि
तेपि पूर्वपक्षिणां त्वासार्वत्रिकप्रामाण्यापह्नवे सिद्धांतिमतं मत्वा प्रकरणावतइत्यादिभाष्येण प्रामाण्यमार्गं दर्शयतीत्याह
स्थितीति । एवमेव लिंगप्रामाण्यमार्गं द्रढयितुमाह । यदेतदिति । यद्वा सार्वत्रिकं लिंगप्रामाण्यं सिद्धांत्यनभिमतमपि विरोध
विषयप्रामाण्योक्तिसौकर्यार्थं काममिति भाष्येण शंकितं तन्निरासार्थं च सामान्यतः प्रामाण्यमुक्तमिति भाष्येण पूर्वपक्षिणो
क्तमित्येवमन्यथा भाष्यद्वयं व्याचष्टे । अथ वेति । तुल्यबलत्वाभावेऽपि विरोधात्समुच्चय इति पूर्वपक्षांतरं भाष्यं व्याचष्टे । अभ्यु
पगम्यापीति । एकस्यानेकार्थता विरुद्धेत्याशंक्य प्रयाजादिजन्यस्योपकारस्यैकस्याप्यनेकार्थत्वदर्शनादविरोधोऽन्यथं नवेति

तं·
८१

तिभाष्यावयवं व्याख्यातुमाह तद्यथेति। अकृताद्दृष्टत्रिदोषापत्तेः विरोधाशंकार्थं नन्विति भाष्यं व्याचष्टे सत्यादिति। प्रधानानुरो
धेन गुणार्थत्वेनर्वाध्यत्वात् विरोधपरिहारार्थमुपसंख्येयेति भाष्यं व्याचष्टे नेति। एकस्येदृशस्य मुख्यजघन्यवृत्तिद्वयविरोधशंका
र्थमयं तद् ९ ति भाष्यं व्याचष्टे ऐंद्रोति। अयोगभेदेन विरोधपरिहारार्थं नेति ब्रूम इति भाष्यं व्याचष्टे नेति। इंद्रार्थत्वे मुख्यत्वेन्नैः सं
भवस्य गार्हपत्यार्थत्वेवासंभवस्याश्रयणादित्यर्थः। अत इत्युपसंहारभाष्यं समुच्चयपूर्वपक्षानुरूपत्वाद्युक्तमाशंक्यावा
धलक्षणार्थत्वेन तुल्यबलो। किंत्याचष्टे तस्मादिति। एवमिति सिद्धांतप्रतिज्ञाभाष्यं व्याचष्टे एवमिति। कुत इत्याद्यवगम्यत इत्यं
तं प्रश्नपूर्वमुपपत्तिभाष्यं व्याचष्टे कुत इति। विधेयस्य मंत्रस्य सामान्यतः समीहितांगांगत्वे विधितोवगते द्वितीययागा२ईपत्य
स्येप्सिततमत्वेन समीहितत्वोक्तेर्गार्हपत्यानीति भवतीत्याशयः॥ कृत्स्नाख्यवचनाभावेपि प्रकरणात्तु सामान्यसंबंधस्य
लिंगादिभिर्नियोगोनविघ्नतीत्यत्रा निधीयत इत्यादिपूर्वपक्षभाष्योक्तार्थानुभाषणार्थं नन्विति भाष्यं व्याचष्टे। यत्त्विति। वैदिकेर्थे
शब्दातिरिक्तप्रमाणायोगात् कृत्स्नभावे लिंगादेः प्रामाण्यं न संभवतीति परिहारार्थं नेतदित्यादि विप्रकृष्टं कृत्स्नार्थी लिंगमित्यंत राम ८१

भाष्यं व्याचष्टे यदिति। श्रुतिं विना प्रामाण्याभावे लिंगस्य श्रुत्यभावेऽनुपपन्नप्रामाण्यात् श्रुतिसद्भावकल्पकत्वायोगेनाऽप्रामाण्यापत्ते
र्बलाबलचिंतानुपपत्तिशंकार्थः पदीत्यादि भाष्यं व्याचष्टे परस्त्विति। अध्ययनविधितो मंत्रस्य सामान्यतः समीहितार्थत्वेऽवगते तद्वि
शेषापेक्षायां प्रकरणेन प्रकृते कर्मणि समीहितविशेषत्वेन समर्पितेऽपि तदुद्देशेन विधिविषयत्वाख्यस्य तादर्थ्यस्यानेनेदं कुर्या
दित्येवंरूपांगांगिभावविशेषस्याभावेनावगतेः समीहितविशेषार्थत्वं च विना सामान्यतोऽवगतस्य समीहितार्थत्वस्यानिर्वाहात्त
न्निर्वाहायानेन यजेतेति श्रुतौ प्रकरणेन कल्पितायां कथं मंत्रेणायागं कुर्यादित्यपेक्षायां यथा शक्नुयादिति सर्वाख्यातसाधार
णोपदेशात्सामान्यतः श्रुत्युद्धारावगमेऽपि तद्विशेषापेक्षायां लिंगेनाभिधानाख्यद्वारविशेषसमर्पितेऽपि पूर्ववदेव मंत्राभिधानयो
रन्वयवाविशेषाभावेऽवस्थानवगतेरभिधानद्वारानेन मंत्रेण यजेतेति द्वारद्वार्यर्थं च यवाविशेषकल्पनेऽपि शक्याभिधानाख्यद्वा
रांगतयात्मा श्रुतिसिद्धत्वेन मंत्रस्य प्रकरणेनेतिकर्तव्यतात्वरूपांगतया बोद्धुमशक्यत्वात्करणादिरूपेणेतिकर्तव्यतात्वातिरिक्तं
गत्वे प्रकरणस्याव्यापारादभिधानाख्यद्वारविशेषांगत्वे लिंगव्यापारावगतेरनेनेन्द्रोऽभिधेय इत्यंगांगिपन्वयवाविशेषकल्पनस्यैं —

तं.व.
८२

गिकविनियोगान्यथानुपपत्तिलक्षणार्थापत्त्यवगतश्रुतिमूलत्वेन लिंगप्रामाण्योक्त्यर्थमन्त्रेत्यादिश्रुतिमूलत्वे वाक्यमर्थ इत्यं
तं भाष्यं व्याचष्टे सिद्धं तेनेति । लिंगस्य श्रुतिकल्पकत्वे सति विरोधेपि स्मृतेरिव श्रुतिकल्पकत्वाविघातात् प्रामाण्याविघातशंका
र्थं यदीत्यादि त्र्यर्ह इतीत्यंतं भाष्यं व्याचष्टे परस्त्रमदीयमेवेति । नापीत्यादिबाध्यत इत्यंतं भाष्यं मात्पर्यंती प्रामाण्यविकल्पाख्य
दोषद्वयपरिहारार्थत्वेन व्याचष्टे सिद्धं तेनेति । विकल्पायोगोपपादनार्थं यत स्थित्या द्व्यर्थविप्रकर्ष इत्यंतं भाष्यमवयवंता त्पर्य
तो व्याख्याति विरोधे चेत्युक्तं । भाष्ये च लिंगभूतस्येंद्रोक्तिसामर्थ्यमालोच्यानेन मंत्रेणेंद्रोपस्थापनमित्ययं श्रौतोर्थो वगम्यत इत्यु
क्तेः सामर्थ्यादिंद्रशब्दमात्रविनियोगः स्यात् तन्न कृत्स्नमंत्रस्येत्याशंक्य कृत्स्नमंत्रविनियोगविषयश्रुत्यनुमानाय प्रवर्तीं कृत्स्नस्य
मंत्रस्यैकवाक्यतामपेक्ष्यालोच्येत्युक्तं । तदस्मै प्रजवति संप्रतिष्ठ्य इतिस्मृतेः संज्ञापादिषु नुमानशब्दस्य पाठमंगीकृत्य — कूप्र
त्ययोत्पत्तिलिंगेन पदमात्रविनियोगात् वाक्यीयकृत्स्नमंत्रविनियोगायोगं स्फुटत्वनुमेयश्रुतिवद्वलिंगाद्यनुमेयायाः श्रुतेः क्व राम
चिदपाठात् पाठं च विना विशिष्टक्रमकवर्णासमूहात्मकश्रुत्यसंभवात् लिंगादिभिः श्रुत्यनुमानायोगमाशंक्य पदमात्रस्य निराका ८२

कां कृत्स्नार्थप्रतिपादनाशक्तत्वेनाप्रयोज्यत्तयापि विनियोगानर्हत्वात् पदमात्रे लैंगिकविनियोगपर्यवसानानुपपत्तेः प्रथममिं
डुपदैकवाक्यत्वालोचनयाकृत्स्नस्य मंत्रस्यैंद्रशक्तिसामर्थ्यरूपलिंगज्ञानं ततः कृत्स्नमंत्रसामर्थ्यालोचनयानुचरितेनाथनेन
मंत्रेणैंद्रोऽभिधेय इति शब्देन प्रयोगवाक्यैकदेशतयाभिसंहितेनोच्चारणक्रमाभावेप्यभिसंधानक्रमात्संभवद्विशिष्टक्रम
कवर्णाभिसमूहात्मकत्वेनावश्यं मंत्रस्यैंद्रांगत्वरूपोर्थोभिहितो भवतीति विज्ञानमित्येवं शंकाद्वयपरिहारार्थं प्रथमं तावदिति
भाष्यावयवमविरोधे श्रुतिकल्पनोपपन्नार्थत्वेन व्याख्यातुं यत्र हीत्युक्तं। प्रत्यक्षश्रुतिविरोधे लैंगिकल्पनायोगोक्त्यर्थं तदे
तदित्यादिभाष्यावयवं व्याख्यातुं यत्वित्युक्तं। गार्हपत्योपस्थानाख्ये नैकेनैवोपकारेण निर्ज्ञातेन मंत्रवाक्यस्य कृतयागोपका
राख्यप्रयोजनत्वात्तु प्रकरणस्यैव कृतयागांगत्वबोधाख्यप्रयोजनत्वान्नैराकांक्ष्यं तत्रेत्यनेनोक्तं प्रयोजनाख्यः समीहितोर्थः
चातुर्वर्ण्यादिवत्स्वार्थिकष्यञुक्तेन भाष्यस्थेन सामर्थ्यशब्देनोक्तः। विकल्पस्य चेत्यादिभाष्यं व्याचष्टे किंचेति। अदृष्टदोषत्वेनान्या
य्यत्वोपपादनार्थं नित्यवदेति भाष्यं व्याचष्टे अनंतरयेति। कृत्युपन्यासेन लिंगमप्युपलक्षितमिति सूचनार्थं लिंगेन चेत्युक्तं। चोदित

तं·र सन्नकृतमित्यनेनकृतं चेति भाष्यावयवं व्याख्यायाचोदितं सत्कृतमित्यनेनाकृतं सत्कृतं न वर्तीत्येवमकृतमिति भाष्यावयवे
८२ व्याख्याते सुक्रमव्याख्यायां को हेतुरित्याशंक्य चोदितस्यापीतरालोचनेनाचोदितत्वापत्तिं हेतुं सूचयितुं तदपेक्षायेत्युक्तं। अ
न्यतराश्रयणोसति इतरकरणस्य चोदितत्ववदाश्रीयमाणस्यनियमार्थेन शास्त्रेणार्थादन्यनिवृत्तेरितराकरणस्यापि चोदित
त्वादददोषायेत्युक्तं तत्रेत्याशंक्येतरन्न कार्यमिति निषेधाभावान्नियमस्य चस्व विषयनियतत्वमात्रपर्यवसानेनान्यनिवृत्त्यावव्या
पारादितराकरणमपि चोदितमिति नाश्रियेनाकृतत्वस्यादोषत्वं स्यादिति तदकरणमपीत्यनेनोक्तं। अकृतस्याथ निषिद्धत्वेनां
दुष्टं करणमित्याशंक्य न शास्त्रपरिमाणत्वादित्यनेन न्यायेन पदार्थेयत्तानियमादधिकपदार्थकरणे चेयत्ताबाधापत्तेरकृत
करणादोषत्वोक्त्यर्थं यावांस्त्रे इति भाष्यं व्याचष्टे कृतेति। तुल्यत्वोपपादनार्थमुभयत्र हीति भाष्यं व्याचष्टे प्रसिद्धीति। विकल्पपक्ष
निरासोपसंहारार्थं तस्मादिति भाष्यं व्याचष्टे तस्मान्नावदिति॥ समुच्चयपक्षस्यापि विरोधात् वल्लपीत्यादि पूर्वपक्षभाष्योक्तस्यानु राम
भाषणपूर्वं निरासार्थमथेत्यादि भाष्यं व्याचष्टे यद्यपीति। विरोधोपपादनार्थं यदकृतसामर्थ्ययोरित्यादि भाष्यं प्रश्नपूर्वं व्याचष्टे क ८२

थमिति। आद्यस्य वाक्योक्तिद्व्याख्यार्थमिंद्रोक्तिः। कृतप्रयोजनत्वोक्तेर्नैराकांक्ष्यसिद्ध्यर्थत्वसूचनार्थं निराकांक्षा इत्युक्तं। यस्मा
न्मंत्रप्रकरणे हे अपि निराकांक्षे कृते लिंगस्य च विनियोगरूपोर्थः साकांक्षाभ्यां मंत्रप्रकरणाभ्यां साध्यः तस्माल्लिंगं कृत्वा विरुध्य
त इत्यर्थः। श्लोकव्याख्या त्वष्ट एक इति। मंत्रप्रकरणयोर्नैराकांक्ष्ये सति इहविक्षुदेहीति त्रिरवघ्नन्नाक्रयतीत्यादिवच्छ्रुतेरपि विनि
योजकत्वायोगात् तत्र गृह्यमाणविशेषत्वेन तुल्यबलत्वे वस्यादित्याशंक्याह दैवं सत्यपीति। विरोधे चेति। सिद्धांतोपसंहारः साप्यह
त्रानतुगुणपादयुक्तमाशंक्य तुल्यार्थत्वेन विशेषस्यानादरणीयत्वाद्ध्रुपपादयितुमाह। तुवे तो रेति॥ मंत्रवाक्यस्य विनियोज्य
त्वेनात्मनोविनियोजकत्वायोगात् लिंगविनियोज्यपदातिरिक्तपदमात्रसमूहस्य वाकृत्स्नवाक्यत्वेन विनियोज्यत्वविनियो
ज्यत्वयोर्द्वयोरप्ययोगात् लिंगविनियोज्यपदैकवाक्यतायाश्चलैंगिकविनियोगापेक्षत्वस्य निःसंदिग्धत्वाल्लिंगेन सह तुल्य
बलत्वशंकानुपपत्तेर्मीमांसकाः लिंगवाक्यविरोधोदाहरणापरितोषात्स्वयमुदाहरणांतरं तावदाह स्योनं ते इति। होतायक्षन्मित्रा
वरुणाप्रशास्तारा प्रशास्त्राद् सुमनसौ मं पिबतां प्रशास्त्यजेति प्रैषः। प्रशास्तृशब्दस्य मैत्रावरुणवाचित्वात्तच्छब्दस्य मैत्रावरुणांया

तं·र·
८४

गे नियुक्तो ततश्च मैत्रावरुणस्य नियोज्यत्वेन नियोक्तृत्वायोगात् नियोगार्थे प्रैषे शक्त्यनुपपत्ते स्वव्यतिरिक्तस्य लिंगेन वि
नियोगवशामान्मैत्रावरुणविनियोजकस्य वाक्यस्य विरोधावगतेर्युक्तोदाहरणं तत्पर्थः। अनुवाक्यापूर्वकेषु ८ व प्रैषेषु मै
त्रावरुणविधिर्न केवलेष्विति सूचनार्थं होतृप्रवचनाधीनत्वविशेषणं कोनुष्ठाने विशेष इत्यपेक्षायामाह त्वेति। मैत्राव
रुणस्य यागे नियोगादस्मिन्प्रैषे कर्तृत्वाशक्तेः अशक्तस्य च विनियोगायोगात् वाक्येन प्रैषे विनियोगायोगमात्रं कथं वाका
वगतेन प्रैषकर्तृत्वेन नियोगावगतत्यागकर्तृत्वबाधात् होतुरेवं समाख्यावगतयागकर्तृत्वबाधकाभावेन यागे नियोगावग
ते मैत्रावरुणस्य प्रैषे शक्त्यविरोधात्। अत्र मतिवेत्युक्तं केन परेण मैत्रावरुणो यागे नियोक्तव्य इत्यपेक्षायां सवपरो हो
ता नियोक्ता विप्रतिषेधे करणः समवायविशेषादितरमन्यत्तेषां यतो विशेषः स्यादिति सूत्रशेषोक्तिनन्यायेन विज्ञायत इत्युक्तो
पदिष्टस्यात्कृष्टकार्यकारित्वप्रसिद्धे मैत्रावरुणादुत्कृष्टस्य होतुर्मैत्रावरुणकार्यकारित्वायोगात् मैत्रावरुणादपकृष्टस्या राम
नंतरस्य होतृपुरुषत्वेन मैत्रावरुणसदृशस्याच्छावाकस्यैवानेन न्यायेन मैत्रावरुणकार्यकारित्वप्राप्तेरपरितोषात्समाख्य ८४

याहोतृकर्तृकत्वं प्रैषस्योक्तं प्रैषार्थे पि तर्हि यागे समाख्यया होतैव कर्तास्यादित्याशंक्याग्रे सो लिंगेन समाख्याबाधः प्रैषा
र्थस्य तेनोक्तः । अत्र ब्राह्मणयोर्विरोधे मंत्रस्य तु ब्राह्मणचोदितार्थप्रकाशनान्नत्यरतंत्रत्वं त्रेरित्यैश्चछिकरणवार्त्तिके मंत्रस्य ब्रा
ह्मणानुरोधेन नित्योक्तः प्रैषमंत्रानुरोधेनेह ब्राह्मणवाक्यबाधोन युक्त इत्याशंक्याह अध्यापि चेति । ब्राह्मणान्यथाकृतिस्तु नवि
वक्षितेत्याशयः । कीदृशं लिंगमित्यपेक्षायामाह अदिहीति मैत्रावरुणस्य प्रैषकारित्वे हेतुः समाख्यावगतप्रैषार्थयागकारि
त्वापत्तेः यागनियोज्यान्यथैन प्रशास्तृशब्देन होता वाच्यः स च मैत्रावरुणकार्यान्नापन्नत्वान्न शक्यो वक्तुमित्याशयः । मैत्रावरुणस्य
प्रैषार्थकारित्वे पि होतृशब्दो मैत्रावरुणे नर्थकः स्यात् तस्य चादिष्टत्वेनानुपसंजातविरोधत्वान्न युक्तानर्थकाभ्युपगंतुमिति लिं
गस्य विरोधस्यैतदुदाहरणं स्यात् ततश्चोपक्रमस्थेन होतृयष्टृत्वलिंगेनोपसंहारस्थस्य प्रशास्तृयष्टृत्वलिंगस्य बाधः स्या
दित्याशयेन शंकते अनुवेति । अथ वेदविहितकर्मकारित्वगुणयोगेन होतृशब्दस्यार्थवत्वाभ्युपगमे प्रशास्तृशब्दस्यापि तुल्या
र्थवत्तेत्याह मैत्रा इति । आदिरित्यादिशब्दसूचितं होतृशब्दस्य गौणत्वायोगं प्रकटयितुमाह । अपि चेति । शंकाशयं प्रकटयन्नुपसं

तं॰र ८५ हरति तस्मादिति। होतृशब्दस्य होतरि मुख्यार्थत्वान्नो ऋग्वेदविहितकर्मकारित्वस्य निमित्तत्वेन मैत्रावरुणे गौणत्वान्निमित्तत्वा
योगात् तत्कार्यापत्तिरेव निमित्तं वाच्या मैत्रावरुण एव होतृकार्यमृग्वेदविहितं कर्म करोतीति न तु मैत्रावरुणकार्यं प्रैषानुवचनं
होतेत्याशयेन परिहर्तुमाह अत्रेति। एवमपि होतृशब्दस्य गौणत्वदोषोऽपरिहृतः स्यादित्याशंक्य सर्वथा तावदित्युक्तं। अ
गत्या त्वमुख्यस्यापि गौणत्वं न दोषायेत्याशयः। अध्वर्यवो याजयंति विनिषद्य ज्ञातारः स्तुवतीत्यादौ च मुख्यालिंग्याविनोर
ध्वर्यूद्गातृशब्दयोस्तत्पुरुषद्वयेपि प्रयोगादर्शनात् होतृशब्दस्यापि मुख्यार्थलिंग्याविनस्तत्पुरुषे मैत्रावरुणे वाचितां कल्पयितुं यु
क्तमित्याशयेनुमाह सर्व एवेति। अथाह यद्धोताय जतीति मैत्रावरुणो होत्रे प्रेष्यत्यथ कस्माद् होतृसंज्ञा होत्राशंसिष्णो होता
यक्ष होता यक्षदिति प्रेष्यतीति वा होतृशब्दप्रवृत्तिनिमित्तं एष ह्याह्वाता वै होतारामाहारः सर्वैकृत्विज इति प्रतिवचनालोचना
याहोतृशब्दस्य गौणतावसीयत इति सूचनार्थः सर्वशब्दः। अतो होतृलिंगत्वाभावान्नायं प्रैषमंत्रो होतारं नियुंक्ते किंतु प्रशास्तृ राम ८५
लिंगत्वात् प्रशास्तारमेवेति न हलिंगयोर्विरोध इत्युपसंहर्तुमाह तस्मादिति। एतत्प्रैषानुवचनमात्रविषयमेवं च लिंगेनवा

तं॰र ८६ वद्वांतरवाक्यभेदायोगात्स्वातंत्र्येणोक्तौ विधेयत्वाभावेनांगांगित्वाद्यपेक्षाभावात् वाक्यैकवाक्यत्वानुपपत्तेरिहावांतरवाक्यभेदे
सति वाक्यैकवाक्यत्वायोगात् सत्यपि च वाक्यैकवाक्यत्वे लिंगस्यावांतरवाक्यविनियोग एव पर्यवसानसंभवेन वाक्यांतरैकवाक्य
त्वानपेक्षत्वाल्लिंगापेक्षेणा वाक्येन विनियोगस्यानपेक्षितस्यावांतरवाक्यांतरस्यार्थांतरे च लिंगविनियोगेन निराकांक्षीकृतस्य
लिंगविनियोज्यावांतरवाक्यैकवाक्यभूतावांतरवाक्यांतरविनियोजकतया लिंगापेक्षणा वाक्येन विनियोगात्तन्नोक्तेर्वाक्यस्य
विनियोजकत्वायोगात्सत्यपि विनियोजकत्वे लिंगस्य वाक्यानपेक्षत्वनिश्चयाद्वाक्यस्य लिंगापेक्षत्वनिश्चयात्तुल्यबलत्ववा
क्यबलीयस्त्वयोः शंकानुपपत्तेरेतत्समाधानापरितोषादन्यथा समाधत्ते अथवेति। श्लोकद्वयाचष्टे तस्मिन्निति। साकांक्षावयव
त्वे सत्यपार्थक्याभावादेकवाक्यत्वायोगमाशंक्य साकांक्षावयवत्वेनैवार्थैक्यस्य कल्पयितुं शक्यत्वादिदमेवैकवाक्यत्वे प्रधानं
कारणमित्युक्ता साकांक्षावयवत्वेनार्थैक्यकल्पनं शक्यते हीत्यनेनोपपादितं यदीत्यादिना लिंगबलीयस्त्वस्य नानावाक्यत्वाप्रा राम
दकतापपादिता। वाक्यस्य तद्दौर्बल्यत्वात्मकत्वाद्विरोधे बलाबलचिंतावानयुक्तेत्याशंक्याह नेति। वाक्यस्यात्रात्मलाभोस्ति न वेत्य ८६

वमिहचिंत्यते ननुलब्धात्मकस्य वाक्यस्य लिंगेन सह विरोधे समनिबलाबलमिति वाक्यात्मलाभस्यानंतरं क्रियमाणस्य बलाबलसहि
तो विरोधो लिंगवाक्ययोर्विरोध इति भाष्यस्य विरोधो न्वयोक्तो ननु लब्धात्मकस्य वाक्यस्येति वद्दता सूचिते वाक्यात्मलाभस्य भाष्य
नारूढत्वमाशंक्य कृत्स्नस्य मंत्रविनियोगोक्तिद्वारा कृत्स्नस्यैक मंत्रतोक्तेत्युक्तं अनेन च किं कृत्स्न एको मंत्र इति कृत्वा कृत्स्न उनयत्र
विकल्पेन समुच्चयेन वा प्रयोक्तव्यं तेउ कल्पयाम्पत एको मंत्रस्त्वस्मिन्नसादेत्येवमादिरपर इति कृत्वा विनत्पेत्येव संदेह भाष्य
व्याख्या सूचिता। वाक्यात्मलाभ एव तर्हि कस्मान्न साकांक्षा हि चारित इत्याशंक्याह तन्नापीति। साकांक्षावयवत्वेनापाततो वाक्य
त्मलाभ प्रतिभासस्य लैंगिकेन वाक्यभेदप्रत्ययेन बाधे सत्यनिर्वाहाद बाधे तु निर्वाहाद्वाक्यात्मलाभसदसद्भावाद्यर्थबाधकस
द्भावविचार इत्याशयः। किंतावदिति पूर्वपक्षभाष्यं व्याचष्टे किमिति। विकल्पबलत्वे पूर्वपक्ष्यमाणे कृत्स्नो मंत्र उनयत्र प्रयो
ज्य इति पूर्वपक्षवचनव्यक्त्यसंभवमाशंक्य पुरोडाशसादने वेति वकारेण विकल्पप्रयोगोपि प्राप्तिकः सूचितः। पुरोडाश
सादने वेति वा शब्दाध्याहारेण उनयत्र विकल्पेन कृत्स्नप्रयोगः चशब्दाध्याहारेण समुच्चयेन कृत्स्नप्रयोगो भिहित इत्येवं पूर्वपक्ष

तं·र वचनव्यक्तिमाघ्रयाख्यांसूत्रयितुमाह तदाचेति। लैंगिकविनियोगापेक्षे विभिन्नप्रयोगो वाक्यीयविनियोगापेक्षे विकल्प्येतो
८८ पक्षेऽरणासादनयोर्मध्येऽन्यतरत्र समुच्चयेन वाभयत्र समुदायः प्रयोक्तव्य इत्यर्थः। भिन्नप्रयोगस्य वाक्यभेदापेक्षत्वात्स
मुदायप्रयोगस्य चाभेदापेक्षत्वात् तु वाक्यभेदाभेदयोश्चार्थभेदाभेदापेक्षत्वात् तु तावत एव चस्योनादेः सुमनस्यमानांतस्य मंत्र
पदसमूहस्यैकोऽर्थो भिन्नो वेत्यनवस्थितमंत्रशास्त्रार्थयोगाद्धि भिन्नसमुदायप्रयोगयोर्विकल्पो न संभवतीत्याशंकते कथं पु
नरिति समुदायावयववैकल्पिकप्रयोगापादकवैकल्पिकभिन्नाभिन्नरूपत्वं शब्देनोक्तम्। एकस्याप्यतो देवाद्वयंतु न इत्या
देर्मंत्रस्य देवविष्ण्वादिवैकल्पिकदेवतास्मृत्या वैकल्पिकानेकार्थत्वावगमवत् एकस्यापि स्योनादेः सुमनस्यमानांतपदस
मूहस्य विशेषणाविशेष्यभावापन्नैकार्थत्वस्य तन्नार्थद्वयपरत्वं वेत्येवं वैकल्पिकैकानेकार्थपरत्वाविरोधेन वैकल्पिकवाक्य
भेदाभेदविकल्पाविरोधाद्धि भिन्नसमुदायप्रयोगयोरविरुद्धो विकल्प इत्याशयेन परिहरति। स्वर्थ्येति। कथं प्रमाणानां
भिन्नाभिन्नरूपतयाऽनवस्थितत्वस्योनादि सुमनस्यमानांतरं मंत्रशास्त्रार्थावगतिरित्यपेक्षायामाह लिंगेति। वाक्यबलीयस्त्वश् राम ८८

र्वपदोऽस्यार्थमस्त्वेति भाष्यं व्याचक्षाणस्तस्मिन्पक्षे चकारेणाविभज्य प्रयोगसूचनशंकां निराकर्तुमाह यदा त्विति । यथा लि
ङ्गाक्षिप्तं प्रवृत्तेः श्रुतिर्लिङ्गाद्बलीयसी तथा यस्य येन सह संबंध एकवाक्यतया न विप्रतीतेस्तस्य तद्विषया शक्तिः कल्प्यत
इति वार्त्तिकोक्तेन न्यायेन लिंगस्य केवलपदविनियोगे पर्यवसानायोगेन पदान्तरैकवाक्यत्वापेक्षित्वात्तद्वाक्यमपि लिंगाक्षि
प्तं प्रवृत्तेस्स्मृतेर्बलीय इत्यभिधानार्थं तद्धीत्यादि भाष्यं व्याख्यातुं श्रुतिवदित्युक्तं । एवमित्यादि प्रयोजनमस्तीत्यन्तं सिद्धान्तभा
ष्यं व्याचष्टे एवमिति । तस्मिन्नित्यस्याप्युपलक्षणं स्योनादेरिति । स्योनादिः उपस्तरणप्रकाशनाय तस्मिन्नित्यादिश्च सादन
प्रकाशनाय स्वतो वा तेन सामर्थ्येन विनियोगान्निराकांक्षः शक्यते कर्तुं यत्तु साकांक्षत्वं कल्पयित्वा रभ्यते तेन तस्मिन्निति
तच्छब्दार्थानं सत्त्वसादेश्च दैवीति वन्नैकवाक्यत्वापादकं साकांक्षत्वं कर्तुं शक्नोति । त्वध्याहारेणायोग्यं वाक्यात्मलाभहेतोः सा
कांक्षावयवत्वस्य तच्छब्दादापाततः प्रतीतस्यापि स्वतो वा तेन सामर्थ्येन बाधादेकवाक्यत्वस्यात्मलाभ एव नास्ति कुतस्तस्य
तुल्यबलत्वं बलीयस्त्वं वा शंक्येतेत्याशयः । स्योनादेः कल्पयाम्यन्तस्य स्वकार्यसामर्थ्येन विनियोगान्निराकांक्ष्योक्त्या केवलस्य प

तं.र ८९ दस्य लिंगविनियोज्यत्वं शंकानिरासो पि सूचितः । तस्मिन्नित्यादेर्नैराकांक्ष्येप्यर्थस्य प्रकरणाव तद इत्यादेर्विनियुज्यते नेत्यं तस्याध्य
स्य श्रौतं व्याख्यानमकृत्वास्पेनादेर्नैराकांक्ष्यात्मर्थस्य तस्थेत्यादेः पाठ्यात्यस्य श्रौतव्याख्याकरणस्योनादेर्नैराकांक्ष्यस्य स्पष्ट
त्वसूचनायेति सर्वस्मावदित्यनेन सूचनपूर्वं श्लोकं व्याचष्टे सर्वस्मावदिति । उपलक्षिता भाष्यव्याख्याप्रकटनार्थं न वेत्युक्ते तद
न्तस्य पूर्वापेक्षत्वात्कथं परस्य पूर्वेण विनानर्थकत्वानापत्तिरित्याशंकानिरासार्थत्वेन श्लोकांत्यपादव्याख्यार्थं यद्यपि वेत्यु
क्तेनाशीत्यस्य न पुरोडाशसादनइत्यस्य च नाष्यावयवस्यानेनैव पादेन व्याख्येति सूचनार्थं तस्मादित्युक्तं । एवमिति भाष्यस्य
तस्मिन्सीदेति पुरोडाशसादनाभिधानसामर्थ्यादित्यादिना सामर्थ्यावगतसादनविनियोगमात्रेणनैराकांक्ष्योक्तेः सामर्थ्याख्य
विनियोजकप्रमाणाभावेनचोपस्तरणे विनियोगायोगोक्तेस्तस्मिन्सीदेत्यस्योपस्तरणेर्थात्सामर्थ्याभावाभिधानात्पुरोडाश
सादनेपीति भाष्यस्य तत्पत्यादिना सामर्थ्यावगतोपस्तरणविनियोगमात्रेणनैराकांक्ष्योक्तेः सादनेचविनियोज्यमानस्याना राम ८९
मित्यस्य प्रयोजकवाविप्रयोजनशब्दोक्तविनियोगाकृपकसामर्थ्याख्यप्रमाणाभावेन सादनेविनियोगानर्हत्वोक्तेरर्थात्सामर्थ्या

भावाभिधानात्तेन रूढत्वमाशंक्याह एवमिति। अर्थसिद्धस्यापीतरेतरविषये सामर्थ्याभावनिरूपणास्पदा दर्शयेत्यर्थः। तस्मिन्नि
त्यस्य सादने विनियोगान्नैराकांक्ष्यस्योनमित्यस्यास्तु प्रकरणे विनियोगान्नैराकांक्ष्यमस्तीति भाष्यस्यैवं शब्दार्थः। तस्यानंतरस्येति स्त्येन २
भाष्यस्य पूर्वस्य चेत्यनेन सीदेत्यस्य पुनरिति भाष्यस्य च पूर्वेण सहेत्यनेन योनेरूढत्वमाशंक्याह एवेति। तस्मिन्नित्यस्यैकत्र सादने सा
मर्थ्यस्य तस्मिन्सीदेति पुरोडाशसादनाभिधानसामर्थ्यादिति भाष्योक्तस्येतरत्रोपकरणाएवमिति भाष्येणास्योनमित्यस्यैकत्रोपक
रणे सामर्थ्यस्य तच्छेति भाष्योक्तस्येतरत्र सादने पुरोडाशसादने पीति भाष्येणानान्निसामर्थ्यमित्यनुषंगसहितेनाभावं दर्शयित्वा
तच्छब्दालोचनयैकवाक्यत्वस्यावगतस्यार्थैक्यं विनानुपपन्नेरवयवद्वयस्येतरेतरविषये सामर्थ्याविरुद्धं भावमाशंक्यासत्यं तस्मिन्
सीदेत्यस्य पूर्वैकवाक्यत्वादुपकरणे पूर्वस्य च परैकवाक्यत्वात्सादने शक्तिस्तथापि स्वरूपेणोभयोर्मंत्रयोरुक्तन्यायार्थविषयशक्त्य
भावाद्विनियोगाख्यश्रुत्यर्थविप्रकर्ष इत्युक्ते तस्मिन्सीदेति त्वस्योनादिशब्दानामप्युपकरणाख्यसदनकरणोक्तिशक्तेः सदनकृ
णोमीत्येतदेकवाक्यत्वाधीनत्वेन श्रुतस्यायोगाद्विप्रकर्षतुल्यत्वमाशंक्य सदनशब्दवत्स्योनसुशेवशब्दयोर्द्वितीयांतत्वेन कृणोति

तंत्र कर्मभूतस्यसदनशब्दोक्तस्यस्थानस्यमहत्वसुमुखत्वरूपसंस्कृत्यर्थत्वेनतेनशब्दस्यचस्थानापेक्षितस्थानात्पुरोडाशसमर्पकत्वेनद्व
९० तस्यधारयेत्यस्यचकरणसमर्पकत्वेनकल्पयामितिशब्दस्यचसदनक्रियायारचनारूपसंस्कृत्यर्थत्वेनकरणोमिपदैकवाक्यत्वस्य
स्पष्टत्वात्तस्यानादेःकल्पयामीत्यस्यसदनकरणोक्तिशक्तिस्पष्टत्वरूपेणप्रत्यक्षत्वेनप्रथममावगतत्वान्मुख्येतिवदतामयस्यानंतद्
त्यस्येतिमाख्यात्मनिबंधनंस्वरूपनिबंधनंशक्त्याख्यंधर्ममुपनीयासिद्धत्वेनोक्तात्तस्मिन्नित्यादेरपितर्हिपुरोडाशसादनाख्य
सदनक्रियाफलानुपपत्त्वेनकरणोमिपदैकवाक्यत्वात्तत्सदनकरणोक्तिशक्तिकल्प्येत्याशंक्यसदनक्रियायामंत्रेविधेयत्वाभावेनप
क्तत्वात्तच्छब्दस्यचपूर्ववाक्योक्तसदनपरामर्शित्वसंभवेनैकवाक्यत्वनिर्बंधनस्यशक्त्याख्यस्यधर्मस्यानेनाकांक्षासत्यैकवाक्यत्वक
ल्पनायोगेनतन्निबंधनशक्तिकल्पनायोगात्तन्निराकरणंकृतंततश्चभिन्नार्थत्वान्नपौनरुक्त्यमित्येवंसकलोग्रंथोनिराकुलीकार्यद्
त्यर्थःतदेवमणैकवाक्यत्वोपगमनशक्त्याख्यलिंगविप्रकृष्टार्थत्वात्तदर्थस्यसत्यमेवमित्याद्विमाख्यस्यसीदेत्यस्यपुनरित्यनेनोक्त राम
रस्यत्वित्यनेनवापिचेत्यादिनाख्यस्यचतस्मिन्निनियुज्यमानस्यकिंचिदपिप्रयोजनमपश्यन्नेनपौनरुक्त्यापरिहारात्कथंसक ९०

तस्यग्रंथस्यातनाकुलत्वेतेत्याशंक्याहपूर्वश्चेति।कोत्रार्थविप्रकर्षइतिचेच्छ्रुतेरर्थविप्रकर्षःप्रस्तुतस्यचप्रकरणावतइत्यादि
नालिंगंबलवत्तरमित्युक्तेतेनैकस्यावयवस्यप्रधानार्थैनिधानशक्त्यस्यविनियोगप्रमाणसंज्ञावाक्यस्यश्रुतिकल्पनमात्रांतरित
त्वात्सन्निकृष्टेविनियोगारंभकश्रुत्यर्थः।अवयवांतरार्थत्वमभिधानशक्त्याख्यप्रमाणभावेनवाक्यस्यविनियोजकतयाभ्युपगम
नीयत्वात्तस्यचलिंगाख्यश्रुतिकल्पनांतरितत्वात्तद्विप्रकृष्टइत्येवंवाक्यस्यलिंगापेक्षयार्थविप्रकर्षप्रस्तावेपूर्वंकृतेवयवद्वय
स्यैकवाक्यत्वावगमादेकार्थत्वेविनैकवाक्यत्वायोगात्एकस्मिन्नर्थेशक्त्यशक्तीनयुक्तइत्याशंकानिरासार्थंततःस्थानमित्य
षशब्दइत्यादिनाग्रेणलिंगबलेनैकवाक्यत्वेशक्त्यशक्त्युपपादनार्थंनिरस्तेनत्वित्यादिनाग्रेणैकवाक्यत्वोपगमनशक्त्याख्य
लिंगावगतैकवाक्यत्वबाधेलिंगस्यैवलिंगेनबाधापत्तेरेकवाक्यत्वबाधायोगाच्छक्त्यशक्तिविरोधस्यापरिहार्यत्वमाशंक्यएक
वाक्यत्वोपगमनशक्तेर्लिंगत्वेपिविप्रकृष्टार्थत्वेनबाध्यत्वस्योचितत्वात्तद्वाक्यभेदोपपत्तेःशक्त्यशक्त्योरविरोधइत्येवंशक्त्यश
क्त्योरविरोधितयोपपाद्यत्वेनप्रयोजनभूतत्वात्संगतमेवमित्यादिनाग्रेणैकवाक्यत्वोपगमनशक्त्याख्यस्यलिंगस्याभिधान

तं·र शक्त्याख्यलिङ्गलिङ्गापेक्षयार्थविप्रकर्षप्रस्तावो मध्ये हातव्य इत्यस्मृतावन्न्यायस्यासीदित्यस्यापुनरित्यनेनो न रस्यत्वित्यनेनचा
५१ र्थसिद्धादपौनरुक्त्यं। अपि चेति भाष्ये तावाक्यस्य तन्निर्वाहार्थस्य शब्दलिंगस्याभिधानशक्त्याख्यलिंगापेक्षयात् दृष्टार्थत्ववि
शेषणात्वनिमित्तार्थे विप्रकर्षप्रस्तावान्नन्द्यस्मिन्नित्यनेन च प्रमाणासत्वात्क्रूरपौनरुक्त्यं। तत्र दृष्टान्तगतैकवाक्यत्वनिर्वाहार्थे
कवाक्यत्वापगमन शक्त्याख्यलिंगात्कल्पितादेकवाक्यत्वनिर्वाहेच गतेऽर्थ भवान्तरोक्तक्रियाविशेषणोक्तिद्वारावयवान्तर
स्यावयवान्तरार्थाभिधानशक्तेः कल्प्यत्वात्तत्र प्रधानभूतस्यार्थान्नयावनिराकांक्षस्यावयवान्तरार्थविशेषणीभूतस्यार्थाकाङ्क्ष
दृष्टार्थत्वापत्तेः स्वार्थस्यावि शेष्यावयवान्तरार्थाकांक्षा कल्प्येत्यात्तदभिधानशक्तिकल्पनपूर्वकस्वत्पर्थकल्पनाद्विप्रकर्षः प्र
धानस्यस्तस्यार्थमात्राकांक्षामुत्तुदृष्टस्समवेतार्थत्वेनावयवान्तरार्थाकांक्षाकल्पनाभावात्संनिकर्ष इत्येवमाशयत्वादपि चेति
भाष्यस्यात्पर्थः एवमित्यादिभाष्यस्यान्निरूपणादा दृष्टार्थत्वेनाद्यप्रस्तावान्तर्गतित्वात् मध्यमप्रस्तावार्थत्वं न यथुक्तमित्यनव राम
द्यं॥ ॥तस्मादिति लिंगबलीयस्त्वसिद्धान्तोपसंहारभाष्यं व्याख्यात तस्मादिति॥ ॥१॥ ॥ ॥ग्रंथ २४०० ५१

102/1

102/1